Table of contents

# विशुद्धवेदान्तसारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

# विक्रेयाः कतिचन वेदान्तग्रन्थाः

**गीताशास्त्रार्थविवेकः** – श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मितः स्वतन्त्रो ग्रन्थः । अत्र प्रकरणे प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यानादिपदार्थानां विवेकः कृतः । तदनु कर्मयोगध्यानयोगादीनां संबन्धः निरूपितः । साङ्ख्ययोगदर्शनाभ्यां वैलक्षण्यं च गीताशास्त्रस्य स्फुटीकृतम् । शाङ्करभाष्यानुसारेण शास्त्रार्थविवेचनं नूत्नतया सरण्या कृतमत्र ॥

**वेदान्तडिण्डिमः** – भावबोधिनीव्याख्यासहितः । प्रतिश्लोकं वेदान्तवाक्योदाहरणेन वेदान्तप्रमेयानि सुललितशैल्या विशदीकृतान्यत्र ॥

**वेदान्तविद्वद्गोष्ठी** – अत्र श्रीशङ्करभगवत्पादानुगृहीतप्रस्थानसतत्त्वमधिकृत्य विदुषामभिप्रायभेदाः संगृहीताः । श्रीचरणैरनुगृहीताभ्याम् आंग्लगीर्वाणमयीभ्यां पूर्वपीठिकाभ्यां समलङ्कृतश्च ग्रन्थः ॥

**विशुद्धवेदान्तपरिभाषा** – अचिरादेव प्रकाशयिष्यमाणं नवीनमिदं प्रकरणम् । श्रीगौडपादश्रीशङ्करभगवत्पादाचार्यश्रीसुरेश्वराचार्याणां मूलग्रन्थेभ्यः प्रमाणवाक्यान्युद्धृत्य सांप्रदायिकं वेदान्तप्रस्थानसतत्वं परिशीलितम् अत्र । तर्ककर्कशशैल्या विविधप्रस्थानसंकरेण च विरचितैः प्रकरणान्तरैर्विचलितचित्तानां जिज्ञासूनां परमोपकाराय विनिर्मितो ग्रन्थः श्रीसच्चिदानन्देन्द्रस्वामिभिः ॥

**वेदान्तबालबोधिनी** – प्रातःस्मरणस्तोत्रस्य भगवत्पादीयविरचितस्य प्रश्नोत्तररूपं व्याख्यानम् । अस्मिन् प्रकरणे ब्रह्मविद्याया अनुभवावसानत्वं पदे पदे स्मारयन्तीनां भाष्यकारोक्तीनां सरणिमेवानुसृत्य शास्त्रार्थं सुविशदीकृतम् ॥

विस्तृतग्रन्थसूचीप्राप्तये, अधिकविषयाधिगमार्थं
चाभ्यर्थनीयाः अध्यक्षाः

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

अध्यात्मग्रन्थावलिः

# विशुद्धवेदान्तसारः

शाङ्करप्रस्थानप्रक्रियापरिमार्जनपूर्वकं
वेदान्तार्थसारप्रदर्शनपरं प्रकरणम्

रचयितारः
श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १४१

प्रकाशनस्थानम्
अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्

क्रि. १९६८

First Edition
1000 Copies

©

All Rights Reserved by
The Adhyatma Prakasha Karyalaya
Holenarsipur

Registered under the Copy Right Act, 1957

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Karyalaya
Holenarsipur

## PUBLISHERS' NOTE

Swami Sri Satchidanandendra Saraswatiji has explained at great length in his introduction the object of this new work, which he has written at our request. It is intended for the use of critical students of Vedanta as well as beginners.

There are very few writers, if any at all, who have devoted their whole life like the Swamiji, to the arduous task of rescuing the traditional system from later accretions. And we fervently hope that the present work will be appreciated by the public in the same spirit as his previous productions.

Holenarsipur
18-9-1968

Y. NARASAPPA,
*Chairman, A. P. Karyalaya.*

# INTRODUCTION

### TITLE OF THE WORK

This booklet is intended to be a compendium of Vedanta according to S'aṅkara's tradition purged of all later accretions and misrepresentations. It is entitled *Vis'uddha-Vedānta-Sāra* (Essence of 'pure' Vedanta) not only in the sense that it aims at distinguishing this system from all other modes of presentation, pre-S'āṅkara or post-S'āṅkara, but also from unnecessary and clashing doctrines imported from the *Mīmāṁsa*, *Sāṅkhya*, *Yoga*, *Nyāya* and other systems, with which Vedantic doctrines are usually confounded in recent Vedantic treatises and discussions.

In the first place, S'āṅkara-Vedanta has to be contrasted with the *Pūrva-Mīmāṁsā* in so far as it does not take the S'ruti to be merely an authority on the nature of Brahman in the same way as the Vedas are, concerning *Dharma* or religious duty, for S'rutis are *pramāṇa* here because they lead us to the direct intuition *(anubhava)* of Brahman. In the second place Vedantas or the Upanishads, are

not taken here to be mere testimony subservient to inference *(anumāna)*, which latter is the most potent means of knowledge for the *Sāṅkhya* and some other *darśanas*. And in the third place, the Vedanta system does not propose to offer a course of mental discipline with the object of extricating the *Purusha*,—who as one's real self is assumed to be one among many such — from the clutches of *Prakṛti*. Again, Vedanta never appeals to pramāṇas, or empirical means of right knowledge, in establishing the nature of the objects of knowledge, as the Nyāya does. Nor does Vedanta subscribe to the Vaiśeshika's dogma that the Ātman is a substance *(Dravya)* and an object of knowledge *(Prameya)*. And lastly, Vedanta never agrees with the speculative Buddhism of the Yogachara idealist when he infers the sole existence of Vijñāna (momentary consciousness) basing himself on the mere circumstance of invariably simultaneous appearance of both the object and the consciousness of it, and extending the analogy of dreams to waking. Nor is this system an ultra-rationalism like the *Śūnyavāda* of the Mādhyamika who, with a peculiar dialectic of his own, is prepared to demolish logically all views of Reality in order to arrive at the essencelessness of the reasoner himself no less than of all objects.

Actuated by a desire to present the essence of S'aṅkara's Vedanta in a nut-shell from this point of view, I have composed the present work to meet the need of the critical student as well as of the beginner. Accordingly, I have scrupulously confined myself to the standard works of Sri Gauḍapādācārya, Sri S'aṅkarācārya and Sri Sures'varācārya whenever I had to appeal to authorities in support of my views. Of course the truths of Vedanta, according to this tradition, depend upon reason based upon universal intuition and not upon the idiosyncracy or a particular line of interpretation of the sacred literature by any individual ācārya.

The work itself is mainly divided into three sections in view of the three sources of knowledge accepted by this tradition, to wit, direct universal intuition, the mind and the senses. *Adhyāropa-Apavāda-Prakriyā* (deliberate superimposition and rescission), the unique method of exposition adopted in the Upanishads, has been assigned a prominent place, and the line of reasoning known as the *Anvaya-Vyatireka-Nyāya* (tracing the constant reality running through all the variable appearances) has been employed in determining the nature of Reality.

In the second section, special attention of the reader has been drawn to the distinction between the nature of knowledge *(jñāna)* and meditation *(upāsanā)* on the one hand, and *nididhyāsana* (revealing contemplation) and *upāsanā* (meditation in its aspect of staying the mind upon Ātman) on the other. And in the third section, a fairly comprehensive account has been given of *Karma-Yoga* and the successive spiritual stages leading to final realization. The whole work is then rounded off with an account of *Jivan-mukti* (release in this very life) as described in S'aṅkara's classical works.

I hope that a fairly complete outline of S'aṅkara's Vedanta has been presented in this small work with all the special features calculated to mark it off from similar publications already in the field. The style is catechismal in form just to make the flow of argument continuous and easily intelligible.

I shall feel amply rewarded if some of my readers at least are satisfied with this humble attempt and are animated to continue their study in this direction.

My Narayana-smaranams to all those that have rendered this endeavour a success, and especially to the Adhyatma Prakasha Karyalaya

for having accepted the Copy Right of the booklet and published it so soon. I shall gratefully treasure in my heart the benign grace of Bhagavan Narayana that prompted me to take up my pen to write these few pages.

Holenarsipur
8-9-1968

SWAMI SATCHIDANANDENDRA SARASWATI

---

# ग्रन्थप्रवेशिका

—§०§—

## प्रकरणाभिधानम्

अथ वेदान्तार्थसारं जिघृक्षूणां बालानां वेदान्तप्रस्थानप्रक्रियास्वरूपं निर्दिधारयिषूणां शास्त्रपरिचयवतां जिज्ञासूनां च कृते अयमारब्धोऽल्पकायो ग्रन्थः। अस्य च नाम 'विशुद्धवेदान्तसारः' इति। वेदान्तोपदेशस्य केवलं श्रीमच्छङ्करभगवत्पादसम्मतप्रस्थानप्रकारेण–प्रविहाय प्राचीनाद्वैतिप्रस्थानक्षुण्णतत्त्वविवेचनसरणिम्, व्याख्यानप्रस्थानीयविचारसरणिं च – परमार्थतत्त्वप्रतिपादनप्रक्रियासारप्रदर्शनार्थं प्रवृत्तत्वात् अन्वर्थाभिधानमिदं प्रकरणम्। अपरं चास्ति प्रवृत्तिनिमित्तमस्याभिधानस्य। यतो वर्तमानकालीनानि वेदान्तसारसंजिघृक्षया प्रवृत्तानि प्रकरणानि सन्ति भूरिशः, येषु पूर्वमीमांसासाङ्ख्ययोगादिदर्शनान्तरदृष्टप्रमेयार्थान् तत्प्रक्रियाश्च मिश्रीकृत्यैव वेदान्तार्थः प्रतिपाद्यमानो दरीदृश्यते, अत्र पुनर्दर्शनान्तरप्रमेयप्रक्रियापङ्कस्पर्शमन्तरेणैव विशुद्ध एव वेदान्तार्थः प्रतिपाद्यत इत्यतोऽपि विशुद्धवेदान्तसारोऽयम् ॥

## अत्र प्रतिपाद्या विषयाः

अस्मिंश्च प्रकरणे ज्ञानसाधनविशेषदृष्टिविभागानुसारेण त्रय एव वेदान्तार्थोपदेशविभागाः सन्ति। अनुभवप्रधानदृष्ट्या उपदेशः, मनःप्रधानदृष्ट्या उपदेशः, इन्द्रियप्रधानदृष्ट्या उपदेश इति च। तत्रानुभवदृष्ट्या तावत् साक्षाद्ब्रह्मात्मविज्ञानं सम्पादनीयम्, वेदान्तवाक्यार्थविचारणेन। वेदान्तवाक्यविचारणे च न केवलं पूर्वमीमांसादृता वाक्यधर्मविचारणा साधनं भवेत्, नापि साङ्ख्यन्यायाद्यादृता प्रमाणतर्काभ्यां वस्तुतत्त्वनिर्धारणक्रमः, यतो ब्रह्मात्मतत्त्वम् अवाङ्मनसगोचरम्। न च योगदर्शने इव बाह्यमतेऽन्विव वा केवलतर्कावष्टम्भः

समाधिविशेषालम्बनं वा इह कार्यकरं भवेत्; तर्कागम्यत्वात्, वैयक्तिकानुभवसमर्पकावस्थाविशेषानिबन्धनत्वाच्च नित्यसिद्धब्रह्मात्मभावस्य। वैशेषिकदर्शने इव प्रमेयपदार्थतत्त्वनिर्धारणं तु वृथाऽऽयासमात्रफलकमत्र, परमार्थतत्त्वस्याप्रमेयत्वात्। तस्मात्, स्वतःसिद्धस्वयंप्रकाशतत्त्वसमर्पणे वेदान्ताः अध्यारोपापवादाख्यप्रक्रियाविशेषमेवोरीकुर्वन्ति, अनुभवानुसारिणं च तर्कमन्वयव्यतिरेकन्यायरूपं प्रक्रियाशेषत्वेन प्रयुञ्जते च इति साम्प्रदायिकमतमेवात्र विशदीकृतम् अनुभवदृष्ट्या उपदेशावसरे ॥

द्वितीये तु विभागे, उपासनाया मानसकर्मरूपत्वात् तत्र चोदनालक्षणधर्मत्वमेवेति वेदान्तवाक्यानाम् ऐदंपर्यं पूर्वमीमांसान्यायैरेव निर्धारणीयमिति दर्शयित्वा, ब्रह्मोपासनानां ध्येयसाक्षात्कारद्वारैव, कालान्तरे लोकान्तरे ज्ञानप्राप्तिपूर्वकं क्रममुक्तिः–इति प्रदर्शितम्। निदिध्यासनलक्षणं तूपासनं प्रणिधानलक्षणत्वात् यथावस्थितवस्तुदर्शनपर्यवसायित्वाच्च भावनालक्षणात् उपासनातो विलक्षणमेव, तेन चेहैव ज्ञानफलप्राप्तिरिति अध्यात्मयोगापरनामधेयस्य तस्य पातञ्जलयोगादपि वैलक्षण्यं स्वरूपे फले चेति च स्फुटीकृतम् ॥

अथ तृतीयविभागे इन्द्रियप्रधानदृष्ट्या कर्मयोगस्योपदेशः, तस्य च निदिध्यासनापराभिधानध्यानापेक्षया ज्ञानं प्रति बहिरङ्गत्वम्, सत्त्वशुद्धिभक्तिप्राप्तिद्वारा परम्परयैव परमपुरुषार्थसाधनत्वं च–इति सविस्तरं प्रतिपादितम् ॥

जीवन्मुक्तिलक्षणकथनपूर्वकं सर्वेषां च वेदान्तोदितसाधनानां सम्यग्दर्शनद्वारेण स्वात्मन्यवस्थितिलक्षणं दृष्टं फलं यथा भवति तथा श्रुतियुक्त्यनुभवावष्टम्भेन प्रदर्श्य ग्रन्थः परिसमापितः ॥

## कृतज्ञताऽऽविष्करणम्

श्रीमच्छङ्करभगवत्पादसंप्रदायानुसारेण वेदान्तार्थविशेषाः प्रस्थानत्रयप्रमाणानुरोधिसर्वाङ्गावरोधेन प्रस्थानान्तरप्रमेयप्रक्रियासङ्करपरिवर्जनपूर्वकं न कुत्रापि प्रकरणे अद्य यावत् संगृहीता इति मन्वानोऽहम् इमं ग्रन्थं विनिर्माय जिज्ञासूनां विशुद्धवेदान्तार्थनिर्णिनीषूणां ग्रन्थतत्त्वशोधकानां च

करकमले समर्पितवानस्मि । संप्रार्थयन्ते च विपश्चिदग्रिमाः अस्मत्कान् भाषा-दोषान् विचारसरणिदोषांश्चाऽऽवेद्य परिशुद्धसांप्रदायिकवेदान्तार्थप्रसारणरूपे पुण्यकार्ये भागिनो भवन्त्विति । एतत्प्रकरणं लिखितरूपं सकृदवलोक्य मुद्रणावस्थायां च दोषानुन्मार्ज्य ग्रन्थशरीरसंस्करणे सहायीभूतयोः वेदान्त-शिरोमणीत्यादिबिरुदाङ्कितो ब्रह्मश्रीयुक्तः परक्कजे सुब्रह्मण्यभट्टः, अध्यात्म-विद्याप्रवीणः अध्यात्मप्रकाशकार्यालयपण्डितो ब्रह्मश्रीयुक्तो लक्ष्मीनरसिंहमूर्ति-शर्मा चेत्येतयोरुभयोरपि महोपकृतिं नारायणस्मरणपूर्वकमिहोल्लिखामि । अध्यात्मप्रकाशकार्यालयाधिकारिणां ग्रन्थस्वाम्यं स्वायत्तीकृत्य तत्प्रकाशने बद्धादराणाम् अत्यल्पकालावधिनैव ग्रन्थं मुद्राप्य प्रकाशितवतां चोपकारः स्मरणीय एव । अन्ते च यत्प्रसादात् प्रकरणनिर्माणे प्रवृत्तोऽहं तत्परिसमापने च प्राभवम्, तमखिलभूतात्मभूतं भगवन्तं स्मारं स्मारं सर्वभावैर्नमस्ये ॥

श्रीमत्कीलकसंवत्सरे
भाद्रपदकृष्णतृतीयायाम्
इन्दुवासरे

इति श्रीशङ्करचरणस्मरणबद्धजीवनः
सच्चिदानन्देन्द्रसरस्वतीभिक्षुः

# विषयानुक्रमणिका

सूचना – अत्रस्थाः संख्याः पत्रपार्श्वं सूचयन्ति


## विषयप्रवेशः

पत्रपार्श्वानि

प्रकरणप्रारम्भे हेतुः (१)-प्रकरणस्यानुबन्धचतुष्टयम् (२)-साधनानि (३)-साधनचतुष्टयस्य कृत्यम् (५) - गुरुमुखादेव जिज्ञासा कर्तव्या (६) - अधिकारभेदः (६) १-७

## अनुभवदृष्ट्या उपदेशः

नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्म (७)-शास्त्रेण ब्रह्मज्ञानोपदेशः किमर्थः ? (८) - ब्रह्मात्मनोऽहंप्रत्ययविषयत्वेन ज्ञानमज्ञानमेव (९)-प्रमाणबुद्धिरप्यविद्यापुरःसरैव (११)- शास्त्रं प्रमाणप्रमेयव्यवहारं न सत्यत्वेनोपदिशति (११) - वेदान्तावगम्यमात्मतत्त्वम् (१२) - वेदान्तैरविद्यानिवर्तनद्वारा ब्रह्म प्रतिपाद्यते (१३) - अध्यारोपापवादप्रक्रिया (१५) - अनुभवैकगम्यं ब्रह्म (१७) - वेदान्तवाक्यानां तत्स्थपदानां च ब्रह्मात्मन्येव समन्वयः (१९)-सर्वेषामपि वेदान्तानां ब्रह्मात्मैकत्वे परमतात्पर्यम् (२१) - वस्तुमात्रपरस्यापि वेदभागस्य शास्त्रत्वोपपत्तिः (२५) - कार्यकारणभावप्रक्रिया, पञ्चकोशप्रक्रिया च (२७) - आनन्दमयकोशविषये शङ्का तत्परिहृतिश्च (२९) - अवस्थात्रयपरीक्षणप्रक्रिया (३१) - शास्त्रस्य मिथ्यावस्तूपदेशकत्वेऽपि न प्रामाण्यहानिः (४३) - ईश्वरस्य मायोपाधिकत्वेऽपि नेश्वराभावप्रसङ्गः (४४) - तुरीयात्मोपदेशः (४५) - प्रतिषेधवाक्यकृत्यविचारः (४६) ७-५५

## अथ मनोदृष्ट्या उपदेशः

अकारादिसामान्यविदां फलम् (५६) - निदिध्यासनेनात्रैव ब्रह्मात्मावगतिः (६१) ५६-६९

पत्रपार्श्वानि

## अथेन्द्रियदृष्ट्या उपदेशः

कर्मणां ब्रह्मात्मविद्याजनने उपायत्वम् (७०) – कर्मयोगेन परम्परया मुक्ति-प्राप्तिः (७३) – वर्णाश्रमकर्मरहितानां गतिः (७४) ७०–७७

## अथ कृतकृत्यलक्षणम्

जीवन्मुक्तिः (७८) – जीवन्मुक्तिर्न गौणी मुक्तिः (८२) ७८–८५

## उपसंहारः ८५–८६

# सङ्केताक्षरविवरणम्

| सङ्केतः | विवरणम् |
|---|---|
| ई. | ईशावास्योपनिषदि |
| ई. मा. | ईशावास्योपनिषदि, माध्यन्दिनपाठे |
| ऐ. | ऐतरेयोपनिषदि |
| का. | काठकोपनिषदि |
| के. | केनोपनिषदि |
| गी. | भगवद्गीतासु |
| गी. भा. | भगवद्गीताशाङ्करभाष्ये |
| गौ. का. | गौडपादीयकारिकासु |
| छां. | छान्दोग्योपनिषदि |
| तै. | तैत्तिरीयोपनिषदि |
| तै. भा. | तैत्तिरीयोपनिषच्छाङ्करभाष्ये |
| नै. सि. | सुरेश्वराचार्यविरचितनैष्कर्म्यसिद्धौ |
| पा. | पत्रपार्श्वे |
| प्र. | प्रश्नोपनिषदि |
| बृ. | बृहदारण्यकोपनिषदि |
| बृ. मा. | बृहदारण्यकोपनिषदि, माध्यन्दिनपाठे |
| बृ. वा. | सुरेश्वराचार्यविरचितबृहदारण्यकोपनिषद्वार्तिके |
| मां. | माण्डूक्योपनिषदि |
| मुं. | मुण्डकोपनिषदि |
| यो. सू. | पातञ्जलयोगसूत्रेषु |
| वि. पु. | विष्णुमहापुराणे |

| सङ्केतः | विवरणम् |
| --- | --- |
| ब्रे. सू. | बादरायणीयवेदान्तसूत्रेषु |
| श. ब्रा. | शतपथब्राह्मणे |
| श्वे. | श्वेताश्वतरोपनिषदि |
| सं. वा. | सुरेश्वरविरचितसंबन्धवार्तिके |
| सू. भा. | ब्रह्मसूत्रशाङ्करभाष्ये |

| पत्र-पार्श्वे | पङ्क्तौ | स्थाने | पठनीयम् |
|---|---|---|---|
| ६२ | ४ | (का. १-२-५२) | (का. १-२-१२) |
| ६३ | १२ | (सू. भा. १-४१) | (सू.भा. १-४-१) |
| ६४ | अ. १० | आत्मन्येव | आत्मसंस्थं |
| ,, | अ. ९ | ६-१५ | ६-२५ |
| ६५ | १२ | २-३७ | ३-३२ |
| ,, | १४ | २-३४ | ३-३४ |
| ,, | अ. १ | मोक्षाख्या | मोक्षाख्या च |
| ६६ | अ. ४ | (६-२३) | (गी. ६-२६) |
| ,, | अ. १ | रसास्वाद | सुखास्वाद |
| ७० | ३ | शिष्यः | २८. शिष्यः |
| ,, | अ. १ | गी. २-४० | गी. २-४५ |
| ७१ | १ | गी. ३-२० | गी. ३-३० |
| ,, | ५ | व्याख्यत् | व्याख्यन् |
| ७२ | ४ | गी. १८-६ | गी. १८-५ |
| ,, | ६ | यज्ञो दानं तपः कर्म | यज्ञदानतपःकर्म |
| ,, | अ. ३ | यत्र कुत्र | यत्रकुत्र |

॥ ॐ ॥

# विशुद्धवेदान्तसारः

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो
नमो महद्भ्यो नमो गुरुभ्यः

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
अक्षरं ब्रह्म वेदान्तैर्यत्सत्यं तद्गतोऽस्म्यहम् ॥ १ ॥

स्मृत्वा गौडान् द्राविडांश्च सर्ववेदान्तपारगान् ।
तत्प्रस्थानं प्रक्रियां च संगृह्णामि यथामति ॥ २ ॥

—:꩜:—

## विषयप्रवेशः

### प्रकरणारम्भे हेतुः

१. प्रश्रयं प्रार्थयन्ते वेदान्तविचक्षणा विबुधा वेदान्तप्रस्थान-प्रक्रियासारसंग्रहार्थमभिनवं प्रकरणं प्रणेतुं प्रयतमानमिमं जनं क्षन्तुम् । यद्यपि जाग्रत्येव श्रीगौडपादाचार्यप्रणीता माण्डूक्यकारिकाः सर्ववेदान्तसिद्धान्तसारम् आगमोपपत्तिभ्यां प्रतिपाद्य मोक्षिजनाननुगृह्णानाः, भगवत्पादीयानि च भाष्याणि सर्वानपि वेदान्तप्रस्थानगतान् तत्प्रक्रिया-

गतांश्च संशयान् समूलकाषं कषन्ति, तथापि विविधविरुद्धव्याख्यान-प्रस्थानीयोपदेशैर्विचालितबुद्धीनां जिज्ञासूनां व्यामोहो जायत एव परिशुद्धप्रस्थानस्वरूपविषये तत्प्रक्रियाविषये च – इति निश्चप्रचमेतद् वेदान्तपाठनरतानां पण्डितप्रकाण्डानाम् । तामेतां सांप्रतिकीं वेदान्त-पठनपाठनदुरवस्थां भिषजितुकामेन मया वेदान्तप्रक्रियाप्रत्यभिज्ञा, सूत्रभाष्यार्थतत्त्वविवेचनी, पञ्चपादिकाप्रस्थानपरिशीलिनी – इत्यादयो ग्रन्था विनिर्मिताः । ते तु वादप्रधानाः पण्डितानामेव सुखावगाहा इति बालानां सुखबोधायायं वेदान्तप्रस्थानप्रक्रियासार-संग्रहः प्रारब्धः । यद्यपीदं प्राधान्येन जिज्ञासुजनानां कृते विरचितं प्रकरणम्, तथापि अत्रत्यानां गुणदोषाणां परीक्षणेन मामनुगृहीतु-मर्हन्त्येव सन्तः । यत्कारणं नैष्कर्म्यसिद्धिकारोक्तनयेन 'न ख्याति-लाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते । स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषा-श्मसु' ॥

## प्रकरणस्यानुबन्धचतुष्टयम्

२. तत्र वेदान्तो नाम उपनिषत्प्रमाणम् । प्रमाणत्वं चोपनिषदां यथावस्थितब्रह्मात्मविषयकानुभवपर्यन्तज्ञानजननोपदेश-रूपत्वम् । स चानुभवः, अवगतिविज्ञानाद्यपरपर्यायः परमपुरुषार्थः । पुरुषार्थत्वं चास्य निःशेषसंसारबीजभूताविद्यानर्थनिबर्हणेन स्वास्थ्या-धायकत्वात् ॥

तत्र च उपदेशप्राधान्येन प्रस्थितत्वात् श्रुत्यपराभिधाना वेदान्ताः 'आगमप्रस्थानम्' इत्यभिधीयन्ते । गीताशास्त्रादयस्तु तदुपबृंहणाय श्रुत्यर्थस्मरणेन विरचितत्वात् 'स्मृतिप्रस्थानम्' ।

वेदान्तवाक्यमीमांसया स्मृतियुक्त्युपकरणैः सह तत्त्वनिर्धारणाय प्रस्थितत्वात् शारीरकं 'न्यायप्रस्थानम्' इत्युच्यते । तदेवं श्रुतयो वेदान्तशास्त्रम् । शास्त्रार्थत्वात् गीताशास्त्रमपि वेदान्तशास्त्रम् । वेदान्तार्थनिर्णायकत्वात् शारीरकं वेदान्तमीमांसाशास्त्रम् । ब्रह्मात्मतत्त्वं वेदान्तशास्त्रस्य विषयः । ब्रह्मात्मविज्ञानम् अवगतिरूपं शास्त्रस्य प्रयोजनम् । शास्त्रस्य ब्रह्मात्मतत्त्वेन प्रतिपाद्यप्रतिपादकभावः संबन्धः । ब्रह्मात्मज्ञानस्य तु आत्मनः स्वस्थतारूपप्रयोजनेन साध्य-साधनभावः संबन्धः । साध्यत्वं च स्वस्थतायाः ज्ञाप्यत्वमेव, न तु निष्पाद्यत्वम् ; नित्यसिद्धत्वात् । अधिकारी तु विधिवदधीतवेदान्तः साधनचतुष्टयसंपन्नो यथोक्तप्रयोजनप्रेप्सुः ॥

अस्य च वेदान्तप्रकरणत्वात् य एव शास्त्रस्य विषयाद्यनुबन्धाः, त एवेहाप्यनुसन्धेया इति ॥

## साधनानि

३. **साधनानि** तु नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसंपत्, मुमुक्षुत्वं च इति चत्वारि । यद्यपि वेदानुवचनादीन्यपि ज्ञानोत्पत्तिसाधनान्येव भवन्ति 'विविदिषन्ति' (बृ. ६-४-२२) इत्यादिश्रुतिभ्यः, तथापि तेषाम् आरादुपकारकत्वात्, एतान्येव अधिकारिणः साधनानीति परिगण्यन्ते ; एषु हि सत्सु शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये इति ॥

तत्र (१) **नित्यानित्यविवेकस्तावत्** – लौकिकवैदिककर्मसाध्यं यत् तत्सर्वम् अनित्यम्, यदकृतकं तदेव नित्यम् – इति विविच्य

निर्धारणम् । तथा हि 'तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' (छां. ८-१-६), 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥' (बृ. ४-४-६), 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।' (गी. ८-१६) – इत्यादिश्रुतिस्मृतिभ्यः कर्मकृतस्य अनित्यत्वं गम्यते । 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' (बृ. ३-८-१०), 'स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते' (बृ. १-४-१५), 'एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्' (बृ. ४-४-२३), 'तमेव विदित्वाऽतिमृत्युमेति' (श्वे. ३-८), 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥' (गी. १४-२) इत्यादिश्रुतिस्मृतिभ्यो ब्रह्मविद्याफलस्य नित्यता चावगम्यते ॥

(२) **इहामुत्रभोगविरागस्तु** – अनित्यतया दुःखहेतुतया च भोगेष्वरतिः । 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन' (मुं. १-२-१२) इत्यकृतस्य निःश्रेयसस्य कर्मणाऽप्राप्तिश्रवणात्, 'एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति' (मुं. १-२-७) इत्यादिकर्मफलनिन्दाश्रवणात्, 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' (छां. ७-२३-१) इति कालपरिच्छिन्नफले सुखाभावश्रवणात् 'ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥'

(गी. ५-२२) इत्यादिन्यायोपबृंहितस्मृतिभ्यो विषयेन्द्रियसंस्पर्शजानां भोगानां दुःखयोनित्वावधारणाच्च विवेकिन उभयविधभोगेष्वपि हि वैराग्यमुपजायते ॥

(३) **शमदमादयस्तु** – 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति **काण्वश्रुतौ** । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येत्' (बृ. मा. ४-२-२८) इति **माध्यन्दिनश्रुतौ** च परिपठिताः शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः । तत्र **शमस्तावत्** अन्तःकरणस्योपशमः । **दमश्च** बाह्यकरणानामुपशमः । **तितिक्षा** शीतोष्णादिद्वन्द्वबाधया हर्षविषादाकरणम् । **समाधानं** मनसो बाह्यविषयरागजन्याद् विक्षेपाद् व्यावर्तनम् ऐकाग्र्यसंपादनं च । **श्रद्धा** शास्त्राचार्यवाक्येष्वास्तिक्यबुद्धिः, एवमेवैतद्भविष्यतीति विश्वासः ॥

शमादिषट्के गीतासूक्तोऽमानित्वादिज्ञानसाधनगणोऽपि अन्तर्भावितो वेदितव्यः । 'एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा' (गी. १३-११) इति स्मरणात् ॥

## साधनचतुष्टयस्य कृत्यम्

४. एतानि च चत्वारि साधनानि निःश्रेयसार्थिनं बाहिर्मुख्याद् व्यावर्त्य प्रत्यक्प्रवणचेतसं कुर्वन्ति ब्रह्मणश्च प्रत्यगात्मत्वात् प्रत्यक्प्रवणचित्तस्यैव ज्ञाने अधिकार इति युज्यते । तथा हि श्रुतिराह 'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराक्पश्यति नान्तरात्मन् ।

कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ ' (का. २-१-१) इति ॥

## गुरुमुखादेव जिज्ञासा कर्तव्या

५. यथोपवर्णितसाधनवानधिकारी आचार्यगुणसंपन्नं गुरुम् उपसृत्य तदुपदिष्टमार्गेणैव ब्रह्म विजिज्ञासीत । 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ ' (मुं. १-२-१२) इत्याद्यवधारणश्रुतेः । 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२), इत्याचार्यनिर्देशादेव विद्याप्राप्तिरिति श्रवणात् । 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ' (गी. ४-३४), 'यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव' (गी. ४-३५) इति तत्त्वदर्शिभिरुपदिष्टस्यैव ज्ञानस्य मोहापसारणकार्यक्षमत्वोपदेशिस्मृतेश्च ॥

## अधिकारिभेदेनोपदेशभेदः

६. स चाचार्यो न्यायप्राप्तं शिष्यम् अधिकारानुगुणं ज्ञानोपासनाद्युपदेशेन ब्रह्मविद्यां वदेत् । 'तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ ' (मुं १-२-१३), 'ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे । तान् हानुपनीयैवैतदुवाच' (छां. ५-११-७) इत्यादिश्रुतिभ्यः । एकस्यैवाधिकारिणः क्रमेण दोषक्षयापेक्षया भूयोभूयः

प्रकारान्तरेणोपदेशदर्शनाच्च श्रुतौ ; 'एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छां. ८-९-३) इत्यादिस्थलेषु ॥

तस्मात्, अनुभवदृष्टिमनोदृष्टीन्द्रियदृष्टिभेदेन प्रकरणं खण्डशो विभज्य वेदान्तोपदेशसारः संगृह्यते इति सर्वं शिवम् ॥

# अथानुभवप्रधानदृष्ट्या उपदेशः

## नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्म

७. श्रोत्रियं ब्रह्मनिष्ठं शान्तं कञ्चिदाचार्यं साध्यसाधनरूपात् सर्वस्मात् संसाराद्विरक्तः कश्चिदधीतवेदान्तो जिज्ञासुर्विधिवदुपसन्नः पप्रच्छ – 'भगवन् वेदान्तोपदिष्टविधया ब्रह्म विद्वान् परमं पुरुषार्थं प्राप्नोतीति श्रुतं मया ; उपदिश्यते च श्रुतिषु 'ब्रह्मविदाप्नोति परम्' (तै. २-१), 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ।' (मु. ३-२-९) इत्यादिषु । किं तद् ब्रह्म, का च ब्रह्मविद्या, विद्यया वा कथं परप्राप्तिः, ब्रह्मभावो वा ? – इत्येतद् भगवान् ब्रवीतु' इति ॥

आचार्यस्तु स्वादेशप्रकारेण कञ्चित्कालं ब्रह्मचर्येण समुषितं तं परीक्ष्य शिष्यगुणैर्युक्तं दृष्ट्वा परिप्रश्नानन्तरं प्रत्युवाच– 'वत्स, धन्योऽसि यद् ब्रह्मज्ञानेन संसारोदधिं तरितुमिच्छसि । तत् ते प्रवक्ष्यामि ब्रह्मस्वरूपम् । अन्वर्थाभिधानं तत् तावद् 'ब्रह्म' इति ; यतो नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं च ब्रह्म– इति शब्दव्युत्पत्तिबलादेवावगम्यते, बृंहतेर्धातोरर्थानुगमात् । तत्तु सर्वस्यात्मभूतमिति

तथाप्यात्मभूतमेव ; अतो न युक्तः प्रश्नः 'किं तद् ब्रह्म, कथं ज्ञातव्यम्, कुत्रास्ति, कीदृशं तज्ज्ञानम्, कथं वा तत्प्राप्तिः ?' इति । अत एव हि त्वदुदाहृता श्रुतिरपि प्राह 'ब्रह्म वेद ब्रह्मैव भवति' इति, न पुनर्ब्रह्म विदित्वा केनचित् साधनेन ब्रह्म प्राप्स्यति – इति । तस्मात् सर्ववेदान्तोपदेशमेनं मनसि कृत्वा मोहमिमं जहि ब्रह्म मया जिज्ञासितव्यम्, प्राप्यं च इति ॥

## शास्त्रे ब्रह्मोपदेशः किमर्थः

८. शिष्य उवाच – कथं तर्हि भगवन् श्रुतिभिः स्मृतिभिश्च समुपदिश्यते ब्रह्म ज्ञेयमिति ? 'विद्ययाऽमृतमश्नुते' (ई. भा. १४), 'आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्' (के. २–१२), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां. ८–७–१), 'ब्रह्मविदाप्नोति परम्' (तै. २–१) इत्यादि ? न हि प्राप्त एव प्राप्तव्यो भवेत् ; ज्ञात एव वा ज्ञातव्यः ॥

गुरुः – बाढम्, न प्राप्त एव प्राप्तव्यो भवति । तथाप्यात्मन एव सतो याथात्म्यानवबोधाद् देहादिष्वात्मभाव इव भवति भ्रान्त्या । तदेवम् अविद्यया देहादिभूतस्य आत्मनोऽप्यात्मा अप्राप्तः प्राप्यो भवति । तेन श्रुतिभिरुपदिश्यते आत्मा अन्वेष्टव्यः प्राप्तव्यश्चेति । अतो न विरोधः ॥

यत्पुनश्चोदितं त्वया – ज्ञात एव न ज्ञातव्यो भवतीति, तत्र सामान्येन ज्ञातोऽपि विशेषेण न ज्ञातः – इति ज्ञेयत्वोपदेशो न विरुध्यते ॥

## अहमात्मनोऽहंप्रत्ययविषयत्वेन ज्ञानमज्ञानमेव

९. शिष्यः — ननु भगवन्, ज्ञात एव मया ममाऽऽत्मा 'अहम्' इति। तत्र किमवशिष्यते यज्ज्ञातव्यम्? किं च ममात्मायं द्रष्टा, श्रोता, मन्ता, विज्ञाता — इति च जानाम्येव स्वात्मानम्, अतः किमवशिष्यते यज्ज्ञातव्यम्?

गुरुः — सत्यम्, जानासि त्वमात्मानम् 'अहम्' इति। तथापि देहादीनपि 'अहम्' इत्येव तत्तद्व्यवहारकाले विभावयसि 'स्थूलोऽहम्', कृशोऽहम्, बालोऽहम्, युवाऽहम्, वृद्धोऽहम्; उपविशामि, तिष्ठामि, धावामि' इति, 'मूकः, काणः, अन्धः, बधिरः, खञ्जः' इति; 'इच्छामि, द्वेष्मि, संकल्पयामि, संशये, निश्चिनोमि' इति चैवम्। एवं च 'अहमेव देहः, देह एवाहम्', 'अहमेव इन्द्रियम्, इन्द्रियमेवाहम्', 'अहमेव मनः, मन एवाहम्' — इति देहादि-तादात्म्यं 'ममैवायं देहधर्मः', 'इन्द्रियधर्मः', 'मनोधर्मः' — इति च तत्तद्व्यवहारकाले देहादितद्धर्म्यं चाऽऽत्मन्यभिमन्यमानो भवान् 'अहमित्यात्मानं मां जानाम्येव' इति वदन् कथं न लज्जसे व्याहत-वचनोऽपि सन्?

शिष्यः — ननु च भगवन्, शरीरादिसङ्घातादन्य एवाहम्, यतः शास्त्रबोधितो देहादिविलक्षण एव कर्मोपासनाफलात् ब्रह्म-लोकान्तादप्यामुष्मिकार्थभोगात् सुतरां निर्विण्णोऽहं ब्रह्मविद्यया परमपुरुषार्थ इति श्रुत्वा ब्रह्म जिज्ञासितुकामो भवत्पादारविन्द-युगलं प्राप्तोऽस्मि। तत्कथमहं न जानीयामात्मानम् ईदृशोऽह-मिति?

गुरुः — भवतु जानासि त्वं देहादिसङ्घाताद् भिन्नमात्मानं परलोकसंबन्धिनम् इति । तथापि तु व्यवहारकाले इष्टप्राप्त्यर्थम् इष्टत्वेनाभिमतं वस्तु प्रति प्रवर्तमानः, अनिष्टपरिहारार्थम् अनिष्टत्वेनाभिमताद् वस्तुनो निवर्तमानश्च देहादितादात्म्यताद्धर्म्यभावनां नैव मुञ्चसीति सुविदितमेव भवतोऽपि । तस्मात् मिथ्यैवेदं यदुच्यते त्वया अहमिति मां विविक्तं जानामीति । तिष्ठतु तावदियं लौकिकव्यवहारकालीना भावना । अभ्युपगम्यापि तव देहादिव्यतिरिक्तात्मनिश्चयोऽस्तीति पृच्छामि 'शास्त्रीयव्यवहारेऽपि किं त्वं देहादेर्व्युत्थितमात्मानं विविच्य जानासि ?' — इति । यतः शास्त्रोक्तवर्णाश्रमवयोऽवस्थादिमन्तमात्मानम् अध्यवसायैव खलु यागादिषु प्रवर्तसे त्वम् ; न खलु देहादिगतवर्णाश्रमादीन् आत्मन्यनध्यस्य सा प्रवृत्तिः संभवति । न च देहाद्यात्मभावनां सम्यग्ज्ञानमित्यनुजानासि त्वम् । मिथ्याज्ञानमेव हि देहाद्यात्मबुद्धिरिति ॥

शिष्यः — ननु च भगवन्, शास्त्रप्रामाण्यादेव ब्राह्मण्यादिज्ञानं मम जातम्, न तु लौकिकभ्रान्त्या । तथा यागादीनां साधनत्वं स्वर्गादीनां तत्फलत्वं च शास्त्रप्रमाणजनितमेव । प्रमाणभूतेन वेदेन चोदितं हि कर्म नाम भवति, तदुपदिष्टमेव च पारलौकिकं साध्यं तत्साधनं वा । अहं तु ततोऽपि विरक्त एव भगवन्तं प्रपन्नोऽस्मि नित्यपुरुषार्थसाधनबुभुत्सया इत्यवोचम् ॥

गुरुः — न खलु न खलु सोम्य, नैवं मन्तुमर्हसि । यत्कारणं प्रमाणबुद्धिरपि देहाद्यात्मभावनां नातिवर्तते । तथा च एवमपि त्वमात्मानं याथार्थ्येन न जानासीत्येव स्यात् । यद्येष एव तवाभिप्रायः, तर्हि किमित्यूचिवान् ममात्मानं जानाम्येवेति ?

## प्रमाणबुद्धिरप्यविद्यापुरःसरैव

१०. शिष्यः — कथं पुनर्भगवन् , प्रमाणबुद्धिरप्यज्ञानं भवेत् ? यावता प्रमाणैः खलु प्रमाता प्रमेयं याथात्म्येन विजानाति । अज्ञानं हि नाम ज्ञानाभावः, संशयः, विपरीतग्रहणं वा इति लोके प्रसिद्ध-मेतत् ; प्रमाणं तु वस्तुयाथात्म्यप्रकाशनसाधनमिति च । तत्र प्रमाणबुद्धिरपि चेत् अज्ञानम् , तर्हि ज्ञानाज्ञानयोरितरेतरत्व-प्रसङ्गः, सर्वत्र व्यवहारे अनाश्वासश्च स्यात् । अपि चैवं वेदान्तेष्वपि कथं विश्वासः, प्रमाणत्वाविशेषात् तदुपदेशप्रवृत्ते-रप्यज्ञानान्धकारक्षेत्रानतिक्रमादिति ॥

गुरुः — शृणु सौम्य, यथैतत् सङ्गतम् । न मया प्रमाणाप्रमाणयो-रितरेतरभावः प्रतिज्ञातः, येनेत्थम् अभियोगः शोभेत । यत्र यत्र प्रमाणप्रवृत्तिः, तत्र तत्र देहेन्द्रियादिषु अहंममाभिमानवत एव तदाश्रयत्वेन भाव्यमित्येतावत्तु मयोक्तम् । न हीन्द्रियाणि मनश्च आत्मीयत्वेनानुपादाय प्रत्यक्षादिप्रमाणव्यवहारः संभवति । न चेन्द्रि-याधिष्ठानभूतं शरीरमात्मत्वेनागृहीत्वा इन्द्रियादीनां प्रमाणानां व्यापार-यिता कश्चिदवकल्पते । प्रमाणानां व्यापारयितैव हि प्रमाता नाम । तस्मात् यथैव लौकिकव्यवहारे, तथैव शास्त्रीयव्यवहारेऽपि प्रमाण-प्रमेयबुद्धिरात्माज्ञानपुरःसरैवेति सिद्धम् ॥

## शास्त्रं प्रमाणप्रमेयव्यवहारं न सत्यत्वेनोपदिशति

११. नन्वेवं सति भगवन् , कर्मशास्त्रस्य वा, वेदान्तशास्त्रस्य वा शास्त्रत्वमेव हीयेत । अज्ञानपुरःसरप्रवृत्तिजनकत्वात् । शास्त्रत्वं हि नाम अतीन्द्रियार्थविषये सम्यग्ज्ञानजनकत्वमितीष्यते सर्वै-रास्तिकैरिति ॥

न । पुरुषार्थोपदेशपरत्वात् शास्त्रस्य । कर्मशास्त्रं तावद् यथाप्राप्तमेव पुरुषस्य प्रमातृत्वं कर्तृभोक्तृस्वभावत्वं चोपादाय पुरुषार्थसाधनं विधत्ते, एवं वेदान्तशास्त्रमपि संसारहेतोरविद्याया निवर्तिकां ब्रह्मविद्याम् उपदिशति मुमुक्षून् प्रतीति न शास्त्रस्यैतावता अप्रामाण्यं स्यात् । कर्तृत्वप्रमातृत्वयोः परमार्थत्वेनोपदेशे हि शास्त्रस्य अयथार्थबोधनादप्रामाण्यं स्यादिति ॥

## वेदान्तावगम्यमात्मतत्त्वम्

१२. नन्वेवमपि भगवन्, किमवशिष्यते बोद्धव्यं यथार्थम् आत्मस्वरूपम्, यदवगमनेन वेदान्तशास्त्रस्य प्रामाण्यं सिध्येत् ? का च सा अविद्या यन्निवर्तिका ब्रह्मविद्या अभिमता भवताम् ?

इदमवशिष्यते यद्वेदान्तैकवेद्यम् अपेतब्रह्मक्षत्रादिभेदम्, सर्वात्मकम्, अप्रमातृकर्तृभोक्तृ, अद्वैतात्मतत्त्वमवाङ्मनसगोचरं ब्रह्मसंज्ञकम् । 'ब्रह्म तं परादाद् योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद् योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेद' (बृ. २–४–६), 'इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा' (बृ. २–४–६), 'एकमेवाद्वितीयम्' (छां. ६–२–१), 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति

यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् तत्केन कं जिघ्रेत् तत्केन कं रसयेत् तत्केन कमभिवदेत् तत्केन कं शृणुयात् तत्केन कं मन्वीत तत्केन कं स्पृशेत् तत्केन कं विजानीयात्' (बृ. ४-५-१५), 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै. २-९) इत्यादिश्रुतिभ्यो ह्येवंस्वभावकोऽयं ब्रह्मात्मेति गम्यते । "ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥" (गी. १३-१२, १३, १४) इत्यादिस्मृतिभ्यश्च ॥

## वेदान्तैरविद्यानिवर्तनद्वारा ब्रह्म प्रतिपाद्यते

१३. यद्येवं भगवन्, कथं तद् वेदान्तैरपि प्रतिपादनीयं भवेद् ब्रह्म, यत्कारणं तद्वाङ्मनसागोचरम् इति तैरेवोद्घोष्यते । कर्तृत्वप्रमातृत्वयोर्वा अपरमार्थत्वं केन प्रमाणेन जिज्ञासुना निश्चेयमिति चित्रीयते मन्मनः । एतत् सर्वं यथा मम हृदयमागच्छेत् तथा विशदय्य अनुगृह्णातु भगवानिति संप्रार्थये ॥

शृणु सौम्य यथैतत् सर्वम् उपपद्यते । ब्रह्म तावत्तव, मम, सर्वेषां च प्राणिनाम् आत्मभूतम् । न चात्मा नामागन्तुकः कस्यचित्, स्वयंसिद्धत्वात् । अत एव नाऽऽत्मा आत्मनः प्रमाणमपेक्ष्य सिध्यति । तस्य हि लोके प्रमातृत्वेनाभिमतस्य प्रत्यक्षादीनि प्रमाणानि अप्रसिद्धप्रमेयसिद्धये उपादीयन्ते । तत्रैवं सति प्रमेयविषय एव प्रश्नो युक्तः केन प्रमाणेनासौ सिध्यतीति । न तु प्रमाणविषये प्रमातृविषये वा ।

तस्मात्, न युक्तोऽयं प्रश्नः । तथा च श्रुतिः 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान् ध्रुवः ॥' (बृ. ४–४–२०) इति ॥

कथं तर्हि आत्मा विज्ञातव्यः, आत्माविद्यैव च संसारहेतुः – इति चेत् ? न हि स्वतःसिद्धस्यापि अज्ञातत्वं ज्ञातव्यत्वं वा सम्भवेत् ॥

तदिदं प्रागेवोक्तं मया, आत्मन एव सतोऽप्यविद्यया देहाद्यनात्मभूतस्य ज्ञातव्यत्वं प्राप्यत्वं चावकल्पत इति । यत्पुनश्चोद्यते – कथं वेदान्तैरपि आत्मा अवाङ्मनसगोचरः सन् प्रतिपाद्येतेति, तदप्येतेनैव परिहृतं भवति । अविद्यानिवर्तनेनैवानात्मप्रतिपादकत्वम् अभिमतं वेदान्तानाम्, न तु अज्ञातात्मवस्तुज्ञापनेनेति ॥

अत्र मे महान् संशयः, किमविद्या सती असती वा इति ? यदि सा सती, कथं वेदान्तैः शब्दमात्रस्वरूपैर्निवर्त्येत ; अथाऽसती सा, किमस्ति निवर्त्यं वेदान्तवाक्यजनितविद्यया इति ? प्रमेयस्य हि प्रमाणात् प्रागविदितत्वम्, प्रमाणव्यापाराच्च विदितत्वं फलमित्युपपद्येतापि विद्याविद्याविषयत्वम् । स्वयंसिद्धस्य पुनरप्रमेयस्य कीदृशी स्यादविद्या यस्याश्चाभावात् आत्मा अविदितः सन्, विद्यया विदितो भवेदिति न शक्नोमि चिन्तितुमपि ॥

शृणु सोम्य, त्वं निपुणोऽसि विचारणे । सत्यमेवेदम् आत्मविषये नैव विदितत्वम् अविदितत्वं वा संभवतीति । तथा हि श्रुतिः 'अन्यदेव तद्विदितादथो अविदितादधि' (के. १–४) इति । तथापि सर्वसाक्षिणि चिदात्मके प्रत्यगात्मनि अहंप्रत्ययविषयताम्, अहंप्रत्ययिनि च सर्वसाक्षिप्रत्यगात्मत्वं चाध्यस्यति जनः ।

यथैव अहंप्रत्ययविषये अविद्याकृतात्मनि देहादीन्, देहादिषु चाहंप्रत्ययविषयमात्मानम् । एवमात्मानात्मनोरन्योन्यस्मिन्नन्योन्य धर्मांश्चाध्यस्यति । सोऽयमद्वितीयकूटस्थचिदात्मानात्मनोर्विषयविषयिणोः सत्यानृतस्वरूपयोरन्योन्यस्मिन् अन्योन्यात्मकताध्यासोऽन्योन्यधर्मवत्ताध्यासश्च, आत्मानात्मस्वरूपविवेकाभावनिबन्धनमिथ्याप्रत्ययरूपत्वात् **अविद्येति** मन्यते तत्त्वविद्भिः । तद्विवेकेन च, 'आत्मायं परमार्थसत्यरूपः, अनात्मा तु अहमादिः सर्वोऽनृत एव सत्य इवावभासमानोऽपि' इति वस्तुस्वरूपावधारणं विद्या इति च । सेयं यथाभिवर्णिता अविद्या अध्यासलक्षणा, यद्व्यवहित इव भाति नित्यापरोक्षस्वभावोऽप्यात्मा अविवेकिनाम् । एतन्निवृत्त्यर्थमेव सर्वे वेदान्ताः प्रवर्तन्ते इत्यवोचम् ॥

यः पुनः संशयस्तव, किमियमविद्या सती वा असती वा ? यदि सती कथं सा वेदान्तैर्निवर्त्येत, अथासती किमस्ति तन्निवर्त्यम् ? – इति ; न स युक्तः संशयः, यत्कारणमनात्मस्वाभाव्यात् सापि अविद्यादृष्ट्यैव सतीव, वस्तुतस्त्वात्मत्वेन तदन्यत्वेन वा अनिर्वचनीयैव । न ह्यविद्यावान् तां निरूपयितुं शक्नोति, तस्य 'अविद्यावानहम्' इति बुद्धेरभावात्, विद्योदयात् परं तु सा आत्मनोऽन्यत्वेन नासीदस्ति भविष्यतीति ॥

## अध्यारोपापवादन्यायमनुसृत्य विद्याविद्योपदेशः

१७. कस्येयम् अविद्या तर्हि ? न तावदात्मनः, यस्मात् तस्य नित्यशुद्धबुद्धमुक्तस्वभावत्वं ब्रूथ । न चाऽन्योऽस्ति तस्मात्, यतोऽद्वितीयं ब्रह्मैव स इत्यपि ब्रूथ ॥

न खलु सोम्य वेदान्तैरविद्यानिरूपणं प्रारभ्यते, येनेत्थं चोद्यं स्यात् । त्वमेव तु ब्रूपे, 'ममाविद्या' इति । यतो ब्रह्मविद्यां ज्ञात्वा संसारान्मुच्येयम् इत्याशंससे । ब्रह्मस्वरूपत्वमात्मनोऽजानन्नेव हि पृच्छसि कस्येयम् ? – इति । वेदान्तैस्तु खलु नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैव त्वम्, न कस्याप्यविद्या इत्येवोच्यते ॥

नाद्यापि भगवन्, अविद्याया विषये मम संशयः सर्वथा निवर्तितः । नित्यशुद्धबुद्धमुक्तस्वरूप एव सन्नहं कदा किंनिमित्तं स्वरूपं विस्मृत्य एतस्मिन् अविद्याक्षेत्रे संसारेऽवतीर्णः ? न हि निरवद्यमेव सद् विशुद्धं ब्रह्म कदाचित् अकस्मादेव कथञ्चित् अविद्यावत्त्वम् आपेदे – इति शुध्यति वचः । न च निर्दुष्टाः प्रमाणभूताः सन्तो वेदान्ताः नित्यशुद्धबुद्धमुक्तस्वभावमेव सन्तमात्मानं प्रति कमपि विषयं बुबोधयिषन्तीति युज्यते । कथं वा अवाङ्मनसगोचरस्य ब्रह्मणः स्वरूपं वेदान्तैरुपदिश्येत, मुमुक्षुभिर्वा केन साधनेन विज्ञायेतेति ?

अहो मोहस्य वैभवम् ! परिहृतमेव संशयम् अपरिहृतमिव किमित्युपस्थापयति भवान् ? अविद्या कस्यापि नास्त्येव, नित्यशुद्धबुद्धमुक्तब्रह्मस्वरूप एवासि – इत्येव वेदान्ता बोधयन्तीति खलु मयोक्तम् । किं तन्न श्रुतं त्वया ? अविद्यमानामेवाविद्यां विद्यमानामिव विभाव्य ब्रह्मतत्त्वं बुभुत्सूनां कृते एतामेवाविद्यां नैसर्गिकीं लोकसिद्धां सिद्धवदध्यारोप्य प्रमातृत्वकर्तृत्वभोक्तृत्वादिसर्वानर्थमज्ञैर्विकल्पितम् अपोदितुं प्रवृत्ता वेदान्ता नेदंतया ब्रह्म विषयीकृत्य प्रतिपिपादयिषन्ति, किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयन्तः, वेद्यवेदितृवेदनादिभेदमपनयन्तीति तत्त्वम् । तस्मात्, उपाधिकृतं प्रमातृत्वादि सिद्धवत्

परिकल्प्यैव आत्मतत्त्वमुपदिशन्ति; उपदेशानन्तरं कल्पितमप्यपवदन्तीति निश्चिनु । तथा हि वेदान्तसंप्रदायविदः प्राहुः –

> अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥

इति ॥

> विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
> उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ गौ.का. १-१८

इति च ॥

## अनुभवैकगम्यं ब्रह्म

१५. अपगतो भगवत्प्रसादात् अविद्यागतः संशयः । जिज्ञासवः पुनः केन साधनेन तद् ब्रह्म विजानीयुः स्वात्मत्वेन ? – इत्येतत्तु भगवान् मे ज्ञापयितुमर्हति ॥

एतदपि खलु सोम्य, उक्तमेव मया । वेदान्तैर्यथा यथा तत्स्वरूपमुपदिश्यते तथा तथा स्वानुभवमेव साधनीकृत्य विज्ञातुमर्हसि । न हि स्वयंसिद्धमात्मवस्तु बाह्यप्रमेयपदार्थ इव प्रमाणेन परिच्छेत्तुं शक्यम्, अतोऽनुभवेनैव ब्रह्म स्वात्मत्वेन विजिज्ञासस्व ॥

एवं तर्हि भगवन्, ब्रह्मण्यपि प्रमाणप्रमेयविभागोऽस्तीत्येतदापन्नम्, यावता अनुभवस्तत्र प्रमाणम्, तेन च ब्रह्म प्रमीयत इति । कथमेतद् विजानीयाम् अद्वितीयं ब्रह्म ममाऽऽत्मा, अनुभवेन ज्ञातव्यं चेति ? नन्वेतदपि विप्रतिषिद्धम् ॥

न विप्रतिषिद्धम् । अप्रमेयं तत्, स्वात्मभूतमेव – इति विज्ञाने प्रमाणप्रमेयविभागानवतारात् । श्रुत्युपदिष्टविधया अतद्धर्मवारणेनैव एकरूपं तत् – इति ज्ञाने हि न विरोधः । न च जिज्ञासायाः फलाभावः, अनुभवैकदेशेन तत्तदध्यारोपितांशापोहेनान्ततः परमानुभव-

रूपफलावसानत्वाद् विचारस्य । तथा चोक्तं संप्रदायविद्भिः 'न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयोऽनुभवादयश्च यथासंभवम् इह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' (सू.भा. १-१-४, पा. ८) इति । एवं च न प्रमाणप्रमेयविभागो भवत्यत्र ; प्रमाणभूतानुभवैकदेशानामपि फलभूतानुभवस्येव ब्रह्मात्माऽव्यतिरेकात्, अनुभवस्वरूपत्वाच्च ब्रह्मात्मनः । तदप्युक्तम् अभियुक्तैः 'अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते । ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते' (गौ. का. ३-३३) इति ॥

ननु भगवन्, अनुभवोऽपि प्रतिव्यक्ति भिन्नभिन्नो भवति । शीतोष्णाद्यनुभववत् । तत्र कस्य वाऽनुभवः सर्वसंप्रतिपन्नः स्यात् ? अपि च सर्वसिद्धान्तानामपि स्वस्वानुभवापेक्षया उपपन्नत्वमेवाङ्गीक्रियते वादिभिः । न खलु सर्वशून्यवाद्यपि तर्केण स्वसिद्धान्तमनुभवसिद्धत्वेन न साधयतीति ॥

न मया शीतोष्णाद्यनुभववद् वेदनारूपोऽनुभवोऽभिप्रेतः ; किं तर्हि साक्षादात्मानुभव एव । न हि कश्चित् संशेते स्वात्मनि, आत्मा वा न वा – इति । सार्वत्रिकश्चायमनुभवो न कैश्चिदपि तार्किकैरपह्नोतुं शक्यते । अनुभवमात्रशरणा हि वादाः सर्वप्रमाणविदां तार्किकाणां च । अनुभवपर्यवसायीन्येव हि प्रमाणानि प्रमाणत्वेन परिगण्यन्ते । न च शून्यवाद्यपि कश्चित् तर्कम् एतादृशानुभवापर्यवसायिनं तर्कत्वेनोपस्थापयितुं क्षमते । प्रतिवादितार्किकैरपि खलु अनुभवानुसारि तर्क एव अनुभवपर्यवसायी सत्तर्कत्वेनाभ्युपगम्यत इति ।

यथोक्तं तर्कतत्त्वविद्भिः सुरेश्वराचार्यैः – 'इमं प्राश्निकमुद्दिश्य तर्कज्वरभृशातुराः । त्वाच्छिरस्कवचोजालैर्मोहयन्तीतरेतरम् ।' (नै. सि. २-५९) इति । तस्मात्, सर्ववेदान्तगम्यम् अनुभवस्वरूपमात्मानं सार्वत्रिकानुभवेनैव न व्यभिचरितवैयक्तिकानुभवैस्तुलयितुमर्हसि ॥

## वेदान्तवाक्यानां तत्स्थपदानां च ब्रह्मात्मन्येव समन्वयः

१६. नन्वेवमपि भगवन्, सर्वैरपि वेदान्तैरयमेव तात्पर्येण बुबोधयिषितोऽर्थ इति कथं विश्वसिमि ? अन्यथान्यथैव प्रस्थितत्वदर्शनाद् वेदान्तानाम् । तथा हि (१) 'ईशावास्यमिदꣳ सर्वम्' (ई. १) – इति वाजसनेयिनां संहितोपनिषदि सर्वस्यापीश्वरव्याप्तत्वमुच्यते । (२) तलवकाराणामुपनिषदि तु 'केनेषितं पतति प्रेषितं मनः'(के. १) इति प्रश्नपूर्वकम् अन्तर्बहिष्करणानां केनापि देवेन प्रयुक्तानां स्वविषये प्रवृत्तिर्निरूप्यते । (३) काठके च 'उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ' (का. १-१-१) इति किञ्चित् पुरावृत्तमुपक्रम्य 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके' (का. १-१-२०) इति प्रश्नपूर्वकं प्रेतस्यास्तित्वमधिकृत्य चिन्ता प्रतानिता । (४) आथर्वणानां मुण्डकोपनिषद्यपि तथैव 'ब्रह्मा देवानां प्रथमः संबभूव' (मुं. १-१-१) इति वृत्तान्तमेवोपक्रम्य 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मुं. १-१-४) इति सर्वज्ञताप्राप्तिप्रकारो विचारितः । (५) प्रश्नोपनिषदि तु भारद्वाजादिमुखेनान्यान्यानेव प्रश्नान् उत्थाप्य उत्तरं दीयते । (६) माण्डूक्योपनिषदि पुनः 'ओमित्येतदक्षरमिदं सर्वम्' (मां. १) इत्योङ्कारस्य सर्वात्मत्वं निरूप्यते । (७) तैत्तिरीयके तु विविधा उपासना अनुक्रम्य 'ब्रह्मविदाप्नोति परम्' (तै. २-१) इति ब्रह्मविद्यया परप्राप्तिरुच्यते । (८) ऐतरेयेऽपि 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१-१) इत्युपक्रम्य परस्मात्मनः सकाशाज्जगत्सृष्ट्यादि आत्मनो

जन्मादिकं चोपवर्ण्यते । (९) छान्दोग्ये उद्गीथाद्युपासनानि, बहुविधान्यनुक्रम्य श्वेतकेतुनारदादीन् प्रत्यात्मोपदेशः क्रियमाणो दृश्यते । (१०) बृहदारण्यके तु 'द्वया ह प्राजापत्याः' (बृ. मा. १–३–१) इति प्राणविद्यामुक्त्वा ब्रह्मात्मविद्यापि बहुधा प्रतिपाद्यते । तत्रैवं स्थिते, कथमहं निश्चिनोमि यत् सर्वेष्वपि वेदान्तेषु ब्रह्मात्मैकत्वमेव तात्पर्येण प्रतिपाद्यत इति ?

सत्यमेवम् । गुरुसंप्रदायक्रमेणाश्रुतवेदान्तागमात् तदनभिज्ञानानाम् अन्यथान्यथैव प्रतिवेदान्तमुपदेश इति भाति । लब्धगुरुदेवताप्रसादानां तु सर्वेष्वपि वेदान्तेषु वाक्यानि ब्रह्मात्मैकत्वप्रतिपादकत्वेनैव समन्वितानि, वाक्यगतानि च पदानि ब्रह्मात्मस्वरूपविषये एव समन्वितानीति निःसन्दिग्धप्रतीतिर्भवति । तथा हि श्रुतिः 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' (श्वे. ६–२३) इति, 'न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात्', 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' (का. १–२–८, ९) इति च ॥

ननु भगवन्, यदि वेदान्तवाक्यानां तद्गतपदानां च ब्रह्मात्मन्येव समन्वयः, कथं तस्य वाङ्मनसयोरगोचरत्वश्रुतिः 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै. २–९) इति ?

स्मर्तुमर्हसि वत्स, यथाऽवोचम् अध्यारोपापवादाभ्यामेव वेदान्तैः प्रतिपाद्यते ब्रह्मेति, सार्वत्रिकानुभवप्रमाणेनैव तदविरोधितर्केण च वेदितव्यं तदिति च ॥

## सर्वेषामपि वेदान्तानां ब्रह्मात्मैकत्वे परमतात्पर्यम्

१७. कथं तर्हि नानार्थप्रतीतिर्वेदान्तानाम् ?

अधिकारिभेदापेक्षया तत्र क्वचिदुपासनानि, क्वचित् कर्माणि प्रोक्तानि वेदान्तेषु ; परमतात्पर्येण तु ब्रह्मात्मैकत्वमेव प्रतिपाद्यते । तथा ह्यभियुक्तवचनम् 'आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः । उपासनोपदिष्टेयं तदर्थमनुकम्पया' (गौ. का. ३-१६) इति । तद् यत्र न विधिविभक्तिः श्रूयते ब्रह्मात्मवस्तुप्रतिपादनमेव चाधिक्रियते, तादृशानि ब्रह्मात्मवाक्यानि श्रुत्वा मत्वा वेदार्थं निश्चेतुमर्हसि ॥

तथा हि (१) संहितोपनिषदि वाजसनेयिनाम् – 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥' (ई. ३) इत्यज्ञजननिन्दापूर्वकं 'अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति' (ई. ४) इत्यादिना विरुद्धधर्माक्रान्तमिव ब्रह्म निर्दिश्य निर्धर्मकमेकरूपमेव तदित्युपदिशति । 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई. ७) इति चाऽऽत्मैकत्वमुक्त्वा ज्ञानफलं च सङ्कीर्त्य 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' (ई. ८) इति स्वरूपेण अद्वैतात्मतत्त्वमेकमेव सर्वसंसारनिमित्तोपाधिवर्जितमिति ब्रवीति । ततश्च 'ईशावास्यमिदं सर्वम्' (ई. १) इत्युपक्रमे अध्यारोपदृष्ट्या उपन्यस्तमपोदितं भवति । तथा (२) तलवकारोपनिषदि 'श्रोत्रस्य श्रोत्रं मनसो मनः' (के. १-२) इत्यादिना सर्वेषामपि बाह्यान्तःकरणानां

परमार्थचैतन्यप्रयुक्तचिदाभासवतामेव स्वरूपस्थितिव्यापारवत्त्वमुक्त्वा 'अन्यदेव तद्विदितादथो अविदितादधि' (के. १-४) इति विदिताविदितविलक्षणं स्वयंप्रसिद्धमात्मतत्त्वमित्युक्त्वा 'प्रतिबोधविदितं मतम्' (के. २-४) इति प्रतिबुद्धिवृत्तिसाक्षितया अनुभवैकगम्यं तदित्यविषयभूतं सर्वसाक्षिणमेव ब्रह्मात्मानं दर्शयति। एवं च 'तदेव ब्रह्म त्वं विद्धि' (के. १-५, ६, ७, ८) इत्यध्यारोपदृष्ट्या यदुक्तं तदपोदितं भवति। (३) एवमेव **काठकेऽपि** 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्' (का. १-२-१२) इति शरीरे हृदयगुहायां स्थितत्वेनाध्यारोपदृष्ट्या उपन्यस्तस्य आधाराधेयभावस्य संसारित्वाभासस्य च 'न जायते म्रियते वा' (का. १-२-१८), 'आसीनो दूरं व्रजति शयानो याति सर्वतः' (का. १-२-२१) इत्यपवादः क्रियते। तथा 'यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद् भूयो न जायते' (का. १-३-८) इत्यादिनाऽध्यारोपितप्राप्यत्वस्य 'अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते' (का. १-३-१५) इत्यनन्तत्वकीर्तनेन, साक्षादनुभवेनैव मृत्युमुखात्प्रमोक्षकथनेन चापवादः क्रियते। एवमग्रेतनवल्लीष्वपि अध्यारोपापवादौ तत्र तत्र द्रष्टव्यौ। (४) एवं **मुण्डकोपनिषद्यपि** 'यत्तदद्रेश्यमग्राह्यम् ........ सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं १-१-६) इति सूत्रोपन्यासपूर्वकं तद्वृत्तिस्थानीयत्वेन 'अक्षरम्', 'पुरुषः', 'सत्यम्' इति चाभिधीयमानाद् ब्रह्मणः सकाशादेव सर्वाध्यात्मिकादिजगत्सृष्टिं प्रपञ्च्य 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद्

ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥' (मुं. २–२–११) इति सर्वकार्यकारणभावस्यापवादः क्रियते । (५) एवं **प्रश्नोपनिषद्यपि** गार्ग्यप्रश्ने 'भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति' (प्र. ४–१) इत्यादिना अवस्थात्रयविषयं प्रश्नमुत्थाप्य सुषुप्त्युपन्यासेन 'एतत्सर्वं पर आत्मनि संप्रतिष्ठते' इति पृथिव्यादिभूतानां तत्तन्मात्राणां च प्राणान्तानां लयमुक्त्वा जीवस्यापि 'स परेऽक्षरे आत्मनि संप्रतिष्ठते' (प्र. ४–९) इति तस्मिन्नेवाक्षरे संप्रतिष्ठानं प्रदर्श्य, यस्मिन् परेऽक्षरे सर्वं संप्रतिष्ठते तद्विज्ञानेनैव सर्वज्ञता भवतीति 'विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेश ॥' (प्र. ४–११) इति वचनेनोपसंहरन् पिप्पलादः सर्वमप्यध्यारोपितं ब्रह्मण्यपवदतीति गम्यते । (६) **माण्डूक्ये तु** अभिधानाभिधेयविभागरहित ओङ्कार एवेदं सर्वम् इति प्रतिज्ञाय अभिधेयप्राधान्येनावस्थात्रयसाक्षिभूतम् वैश्वानरादिसंज्ञकं ब्रह्म आत्मा इत्यध्यारोपदृष्ट्या प्रकल्पितस्य 'नान्तःप्रज्ञं न बहिष्प्रज्ञम् .... स आत्मा स विज्ञेयः' (मं. ७) इत्यपवादः । अभिधानप्राधान्येन 'जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्रा' (मं. ९) इत्यध्यारोपदृष्ट्या प्रकल्पितस्य मात्रात्रयविभागस्य 'अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः' (मं. १२) इत्यपवादः क्रियते । पादमात्राविभागरहित एव तु ब्रह्मात्मा अवशेष्यते । (७) तथा **तैत्तिरीयके ब्रह्मानन्दवल्ल्याम्** ब्रह्मात्मन एव आकाशादिसृष्टिं पुरुषसृष्ट्यन्तमुक्त्वा, तस्यैव पुरुषस्यान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यान्

पञ्चकोशान् उत्तरोत्तरं पूर्वपूर्वव्यापकान् संदर्श्य तत्र तत्र 'अन्योऽन्तर आत्मा' इत्यविद्याकृतम् आत्मत्वमुपदिश्य पूर्वस्मिन् पूर्वस्मिन् आत्मबुद्धिम् उत्तरोत्तरोपदेशेनापवदति । 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति' (तै. २-७) इति च सकलमूर्तामूर्तसृष्टिमध्यारोपेणोपन्यस्तम् अपवदति, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति (तै. २-९) इत्यविषयभूतं ब्रह्मात्मानमेव परिशेषयति । (८) ऐतरेयकेऽपि अध्यारोपदृष्ट्यैव परमात्मनोऽद्वैतात् लोकलोकपालादिसृष्टिं सृष्टौ परमात्मप्रवेशं तत्र परमात्मदर्शनं च वितनोति । आत्मनश्च जन्मत्रयमध्यारोप्य, विद्यया शरीरभेदं वामदेववचनोदाहरणेनोक्त्या सर्वमध्यारोपितम् अपवदति । (९) छान्दोग्येऽपि सद्ब्रह्मणः सर्वजगतः सृष्टिं जीवात्मना शरीरे प्रवेशं चोक्त्वा 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६-८-४) इति सर्वस्य सन्मूलत्वदर्शनेन सन्मात्रमेव सर्वमित्युपसंहरति 'स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६-८-७) इति चोपसंहरन् पूर्वमध्यारोपितं सर्वमप्यपवदति । एवमुत्तरत्र नारदसनत्कुमारसंवादे इन्द्रप्रजापतिसंवादे च द्रष्टव्येयम् अध्यारोपापवादप्रक्रिया । (१०) एवं बृहदारण्यकेऽपि च खलु 'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च' (बृ. २-३-१) इत्यध्यारोपितस्य मूर्तामूर्तादेः 'अथात आदेशो नेति नेति' (बृ. २-३-६) इत्यपवादः । पृथिव्यादीनामाकाशान्तानां पूर्वस्य पूर्वस्योत्तरस्मिन्नुत्तरस्मिन् ओतप्रोतभावं प्रदर्श्य, यस्मिंस्तदाकाशाख्य-

मप्यव्याकृतम् ओतं च प्रोतं च तदक्षरं 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३–८–८) इति सर्वधर्मनिषेधेनैव निर्दिश्य पूर्वमध्यारोपितं सर्वमपावदत् । नियन्तव्यदेवताभेदसंकोचविकासद्वारेणापि तद् ब्रह्म निर्दिश्य तदपवादाय 'स एष नेतिनेत्यात्मा' (बृ. ३–९–२६) इत्युच्यते । एवं जनकयाज्ञवल्क्यसंवादे, मैत्रेयीब्राह्मणे च यद्यदुपदेशोपायत्वेनाध्यारोपितं तत्सर्वं 'स एष नेतिनेत्यात्मा' (बृ. ४–४–२२, ४–५–१५) इत्यपवदति । तदेतत् सर्वं प्रस्थानत्रयभाष्यार्थपरिशीलनेनैवाधिगन्तव्यमिति दिङ्मात्रमिह दर्शितं मया । शारीरकभाष्यस्य गुरुमुखादध्ययने सर्वमिदं स्फुटतरं विज्ञायेत । तदेवं वेदान्तानां सर्वेषामत्रार्थे तात्पर्यमिति श्रद्धत्स्व ॥

## वस्तुमात्रपरस्यापि वेदभागस्य शास्त्रत्वोपपत्तिः

१८. इदानीं मम श्रद्धा संजाता वेदान्तवाक्यानां ब्रह्मात्मन्येव तात्पर्यं स्यादिति । परं तु वेदान्तानां ब्रह्मवस्तुस्वरूपप्रतिपादनमात्रपरत्वे कथं शास्त्रशब्दार्हत्वमिति तु मया निःसंशयं न विज्ञातम् । उपासनावाक्यानां हि प्रवृत्तिपरत्वात् प्रमाणान्तरानधिगताधिगमयितृत्वाच्च शास्त्रत्वमवकल्पते; ब्रह्मवस्तुवाक्यानां तु विधिशेषतयाप्युपयोगः स्यादिति । इतरथा हि भूतवस्तुमात्रान्वाख्याने प्रमाणान्तरवेद्यत्वमपि ब्रह्मणः शक्यशङ्कम् ॥

नैवं वत्स, मन्तुमर्हसि । न ह्यदृष्टार्थोपदेश एव शास्त्रस्य शास्त्रत्वमित्येकान्तः । एवं हि 'दध्ना जुहोति', 'खादिरो यूपो भवति' इत्यादिवाक्यानामपि वस्तुबोधकताम् विधिकाण्डस्थितानाम् अशास्त्रत्वं प्रसज्येत । वस्तुमात्रस्य प्रमाणान्तरवेद्यत्वमित्यपि नायमेकान्तः । 'तत्त्वमसि' इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यत्वात् ॥

ननु भगवन्, तत्र दध्यादीनां क्रियार्थत्वेनोपदेशात् शास्त्रत्वं स्यात्। इह तु स्वातन्त्र्येणैव ब्रह्मात्मवस्तूपदिश्यत इति वैषम्यम्। यूपाद्युप-देशेषु अलौकिकवस्तूनां यथा विधिशेषतया उपदेशः, तथा इहापि ब्रह्मोपासनाविधिशेषतयैव ब्रह्मतत्त्वं शास्त्रेणोपदिश्यत इति युक्तं कल्पयितुम्। दृश्यन्ते चात्र ब्रह्मोपासनावाक्यानि विधिपराणि 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छां. ३-१४-१), 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' (बृ. २-४-५), 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इत्यादीनि। एवं च कर्मकाण्डम् उपासनाकाण्डं चेत्युभयमपि क्रियाविधिपरमेवेति यद्यपि विधिपरत्वं समानमुभयत्र, तथाप्यत्र मानसिकक्रियाविधिपरत्वं विशेष इत्येतावान् भेद इति न किञ्चिद् विरुध्यते। इत्थमेव च प्रस्थानान्तरकारा अपि व्याख्यान्ति वेदान्तवाक्यानि। तत्र को दोष इति?

नैवम्। श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न हि सोम्य 'अथात आदेशो नेति नेति' (बृ. २-३-६), 'अन्यदेव तद्विदितात्' (के. १-४), 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३-८-८), 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्ममयमात्मा ब्रह्म सर्वानुभूः' (बृ. २-५-१९) इत्यादिब्रह्मात्मस्वरूपप्रधानेषु वाक्येषु विधिविभक्तिः श्रूयते शक्य-कल्पना वा। 'सर्वं खल्विदं ब्रह्म' (छां. ३-१४-१) इत्याद्युपासना-विधिपरेषु तु न वस्तुस्वरूपनिर्धारणं क्रियते। न चान्यत्र श्रुतस्य विधेः शेषत्वं स्वप्रकरणे उपदिष्टस्य ब्रह्मात्मन इति न्याय्यं कल्पयितुम्। अतिप्रसङ्गात्। अपि च 'न केवलं श्रुत्यादय एव प्रमाणं ब्रह्म-जिज्ञासायाम्, किं तु श्रुत्यादयो अनुभवादयश्च' इत्यभियुक्तोक्ति-रप्युदाहृता मया, तच्च न प्रस्मर्तुमर्हसि। न च तत्त्वमसीत्यादिवाक्यैः स्वयंसिद्धार्थबोधनेऽनुभवारूढेऽपि फले तेषाम् अर्थान्तरपरत्वं शक्यं

कल्पयितुम् । यत्तु भाष्यान्तरकारैरन्यथैवार्थो वर्ण्यत इति, तत्रोच्यते । तेषां संप्रदायरहितत्वात्, वेदान्तविषये परिच्छिन्नबुद्धित्वाच्च, श्रुतियुक्त्यनुभवसंवादेन सिद्धस्यार्थस्यानतिशङ्कनीयत्वं भवति । तदुक्तम् – 'तत्त्वमस्यादिवाक्यानां स्वतःसिद्धार्थबोधनात् । अर्थान्तरं न संद्रष्टुं शक्यते त्रिदशैरपि' (नै. सि. १–९८) इति ॥

## कार्यकारणभावप्रक्रिया, पञ्चकोशप्रक्रिया च

१९ एवं तर्हि भगवान् प्रदर्शनार्थं कांश्चिदेतत्प्रक्रियाविशेषान् सविस्तरं दर्शयतु यथाऽस्मिन्नर्थे मम निश्चयो जायेत ॥

तथास्तु । शृणु सोम्य, प्रथमं कार्यकारणप्रक्रियाम् । श्रुतमेव भवति त्वया यथा वेदान्तेषु ब्रह्म 'बहु स्यां प्रजायेय' इति संकल्प्य इदं सर्वमसृजत । तत्र भृगुवरुणसंवादरूपेण श्रावितम् 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद् ब्रह्म' (तै. ३–१) इति वाक्यार्थं तावद् विप्रक्ष्यामः । अत्र भृगुः पितरं वरुणं गुरुत्वेनोपसृत्य पप्रच्छ 'अधीहि भगवो ब्रह्म' इति मन्त्रेण । ततः पिता 'अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचम्' इति ब्रह्मोपलब्धौ द्वाराणि निर्दिष्टवान् । तेनाध्यात्ममेवान्वेष्टव्यं ब्रह्मेति गम्यते । ततो ब्रह्मलक्षणवाक्यम् उदाहृतवान् 'यतो वा इमानि भूतानि' इत्यादि । तेन उत्पत्तिस्थितिलयेषु यदात्मतां न जहति भूतानि, तदेतद् ब्रह्मणो लक्षणम् इत्युक्तं भवति । अत्र लक्षणं नाम स्वरूपम्, न त्वसाधारणो धर्मः ॥

ततः पुत्रो भृगुः कुत्रेदं लक्षणं स्यादिति तपस्तप्त्वा–बाह्यान्तःकरणसमाधानपूर्वकं समालोच्य – अन्नं प्राणं मनः विज्ञानम् इत्येतानि

क्रमक्रमेण ब्रह्मत्वेन विज्ञातवान् । शनैः शनैस्तपसा अन्तरन्तरनुप्रविष्टस्य तस्य आनन्दो ब्रह्मेति विज्ञानं निश्चितमभूत्, तस्मिन्नेव साकल्येन सर्वभूतानां जन्मोत्पत्तिप्रलयकारणत्वरूपलक्षणस्य दर्शनात् । तदपेक्षया अन्यस्यान्तरतरस्यादर्शनात् तत एव जिज्ञासा परिसमाप्ता । अत्र हि अन्नप्राणादयः समष्टिरूपाः भूतानामुत्पत्त्यादिकारणत्वलक्षणानुगमात् ब्रह्मत्वेन निर्दिष्टाः । अन्नादन्तरः प्राणः, ततोऽन्तरं मनः – इत्यादि-क्रमेण च सर्वान्तर आनन्दो ब्रह्मेति निर्णयः कृतः । उपलब्धिद्वारभूता-न्यन्नप्राणादीनि समाश्रित्यैव भृगुर्मनः समाधाय आनन्दलक्षणं ब्रह्मात्मानं विज्ञातवान् इति श्रुतिरुपसंहरति 'सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । य एवं वेद प्रतितिष्ठति' (तै. ३–६) इति । एषा विद्या परमे व्योम्नि हृदयाकाशस्थितबुद्धिगुहायां परमे आनन्दे अद्वैते ब्रह्मणि प्रतिष्ठिता परिसमाप्ता अन्नादिब्रह्मणोऽधि प्रवृत्ता । तत्र साक्षित्वेन स्थितं ब्रह्म यो वेद, एवं भृगुवद् योऽन्योऽपि वेद – परमे व्योम्नि सर्वान्तरभूते व्योम्नि आकाशवदसङ्गे विद्या प्रतिष्ठिता इत्येवं वा यो वेद – सोऽपि आनन्दरूपे परमे ब्रह्मणि प्रतितिष्ठति । ब्रह्मैव भवतीत्यर्थः ॥

अत्र कारणभूता अन्नप्राणादय एव साक्षादालोचिताः, पूर्वस्यां तु ब्रह्मानन्दवल्ल्यां कार्यभूतान् पञ्च अन्नमयादिकोशान् आत्मत्वेनाध्यारोपदृष्ट्या उपस्थाप्य उत्तरोत्तरकोशे आत्मबुद्ध्युपदेशेन तेष्वात्मत्वम् अपोद्यते स्म । तच्चेदं लोकबुद्धिमनुसृत्य उपदेशार्थम् उपायकल्पनम् । दृश्यते हि मूढानामन्नमयकोशभूते शरीरे अनात्मन्ये-वाऽऽत्मत्वाभिनिवेशोऽविद्यानिमित्तः । तमेतमनूद्य ततोऽन्तरं ततोऽन्तरम्

इत्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरम् अनात्मानं मिथ्याकल्पितमेवाऽऽत्मत्वेन ग्राहयत् अन्तिमपर्याये निर्दिष्टस्य आनन्दमयस्य प्रियाद्यवयवेष्वनुस्यूतं लौकिकम् आनन्दम् 'आनन्द आत्मा' इति निर्दिश्य 'ब्रह्म पुच्छं प्रतिष्ठा' इति, यस्य प्रतिपत्त्यर्थं पञ्चेमे कोशा उपन्यस्ताः, यच्च तेभ्यः सर्वेभ्योऽभ्यन्तरम्, येन च ते आत्मवन्तः, तद् ब्रह्म प्रतिष्ठा— इत्याह । अत्राप्यन्नमयादीनां स्वोत्तरकोशव्याप्तत्वात् तद्व्यतिरेकेण ते न सन्त्येवेत्युपदिश्यते, सर्वेषामपि ब्रह्मणा पूर्णत्वात् सर्वव्यापकं ब्रह्मैव सर्वेषामात्मा मुख्यवृत्तेन – इति च । **तथा ह्युक्तमभियुक्तैः –** **'रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके । तेषामात्मा परो जीवः** खं यथा संप्रकाशितः ॥' (गौ. का. ३–११) इति । 'खं यथा संप्रकाशितः' इति तु पूर्वग्रन्थे आकाशदृष्टान्तेन सविस्तरं प्रतिपादितः 'मरणे संभवे चैव गत्यागमनयोरपि । स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः ॥' (गौ. का. ३–९) इत्युपसंहृतः सर्वस्याऽऽत्मा परामृश्यते । तदेवं ब्रह्मणो जातं ब्रह्मण्येव स्थितं ब्रह्मैव चान्ते संविशच्च जगत् परमार्थतो ब्रह्मानन्यदेवेति **कार्यकारणप्रक्रियासतत्त्वं** प्रदर्शितम्, **पञ्चकोशविवेकप्रक्रिया** च कोशेष्वात्मबुद्ध्यारोपेण परमार्थात्मभूतब्रह्मस्वरूपनिर्देशार्थेति स्फुटीकृतम् ॥

## आनन्दमयकोशविषये शङ्का तत्परिहृतिश्च

२०. अत्र मे भगवन्, कश्चित् संशयो वर्तते । संशयस्त्वयं न वेदान्तगतः, किं तर्हि वेदान्तव्याख्यातृविप्रतिपत्तिगतः । केचिद् वदन्ति– स्थूलशरीरम् अन्नमयकोशः, तस्य जागरितावस्थायां प्रतीतिः ; प्राणमयमनोमयविज्ञानमयाः सूक्ष्मशरीरभेदाः ; तेषां तु स्वप्नो

विभक्तावस्था । अन्नमयकोशस्य जागरितैकप्रतिबद्धत्वेन व्यावृत्तत्वेऽपि स्वप्ने एषां त्रयाणामनुवृत्तिदर्शनात् । आनन्दमयस्तु कारणशरीरम् अज्ञानम्, तस्य प्राचुर्यं सुषुप्तावस्थायाम् – इति । श्रुतौ तु नैष विभागो दृश्यते । भगवता अत्र संशयोऽयं छेत्तव्यः, श्रुतिव्याख्यानमेतत् कियत्पर्यन्तं समीचीनमिति ॥

न खलु सौम्य, सर्वेषां व्याख्यातृमतानां सामरस्यं संपादयितुं प्रवृत्तस्त्वम् । तत् किमिति अकस्मात् अन्तराले समुद्भाव्यतेऽयं प्रश्नः ? वेदान्ताः सर्वे ब्रह्मात्मैकत्वमेव तात्पर्येण प्रतिपादयन्ति – इत्येतावत्तु प्रकृतम् । तद् अनुभवाधारेणैव श्रुतिसूत्रगीताख्यप्रस्थानानामेकवाक्यतामापाद्य तत्त्वं निर्धारयितुमर्हसि । श्रीगौडपादाचार्या वेदान्तार्थसंप्रदायविदः, सर्ववेदान्तार्थनिर्दिधारयिषयैव शारीरकभाष्यं प्रणीतवन्तः श्रीशङ्कराचार्याश्चात्र प्रमाणीकर्तव्याः । अनुभवानुसारेण तावत् पञ्चापि कोशाः प्रबोधावस्थायामेव प्रतीयन्ते इति तेष्वेवात्मबुद्धिम् अध्यारोप्यापवादः क्रियते श्रुत्या इत्यवोचम् । तन्मा विस्मर । तत्र श्रद्धादार्ढ्यार्थं भाष्यवाक्यमप्युदाहरिष्यामि, शृणु । तैत्तिरीयभाष्ये तावत् ' प्रियादिप्रयुक्ते हि विद्याकर्मणी । तस्मात् प्रियादीनां फलरूपाणां आत्मसंनिकर्षात् विज्ञानमयादस्याभ्यन्तरत्वम् उपपद्यते । प्रियादिवासनानिर्वर्तितो ह्यात्मा आनन्दमयो विज्ञानमयाश्रितः स्वप्ने उपलभ्यते ' (तै. भा. २–५, पा. २९५) इति स्पष्टमेव स्वप्ने आनन्दमयस्य वासनामयरूपत्वं दर्शितम् । विज्ञानमयस्य कर्तृत्वं वा आनन्दमयस्य भोक्तृत्वं वा शरीरेन्द्रियमनोभिः संपर्कं विना नोपपद्यते ; न च शरीरादिकं शरीराद्याभासो वा कदापि न सुषुप्ते उपलभ्यते ; शक्योप-

लम्भनं वा – इति सार्वजनीनमेतत् । तस्मात्, तैत्तिरीयभाष्यविरुद्धैषा प्रक्रिया । शारीरकभाष्ये खल्वपि 'स्वाप्ययात्' (वे. सू. १-१-९) इति सूत्रार्थव्याख्यानावसरे लिखितमस्ति 'मनःप्रचारोपाधिविशेष-संबन्धात्, इन्द्रियार्थान् गृह्णन्, तद्विशेषापन्नो जीवो जागर्ति ; तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति । स उपाधि-द्वयोपरमे सुषुप्तावस्थायाम् उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इव इति 'स्वं ह्यपीतो भवति' इत्युच्यते'' (सू. भा. १-१-९, पा. ३२, ३३) इति । अत्रापि जागरिते मनःप्रचारम्, स्वप्ने तद्वासनावशेषं चोक्त्वा, सुषुप्तावस्थायाम् उपाधिकृतविशेषाभावादेव 'स्वात्मनि प्रलय' उपचर्यते इत्युक्तम् । तस्मात् श्रुतिप्रमाणादर्शनात्, भाष्यविरोधात्, युक्त्यनुभवविरोधाच्च त्वदुदाहृता प्रक्रिया आभासमात्र-मित्येव सिद्धम् । अवस्थात्रयपरीक्षणप्रक्रियया चैतत् स्पष्टतरं भविष्यति ॥

## अवस्थात्रयपरीक्षणप्रक्रिया

२१. तर्हि तामेव प्रक्रियां याथातथ्येन विशदय्य समनुगृह्णन्तु मां भगवन्तः ॥

तथैवास्तु, तां वेदान्तेषु यथोपदिष्टां श्रावयिष्यामि, सावधानं शृणु । यदेतत् अभिधानाभिधेयविभागेन विभक्तमिव विभाव्यमानं कालत्रयवर्ति कालत्रयातीतं च, तत् सर्वमपि अभिधानाभिधेयविभाग-रहितपरमार्थतत्त्वमेवेति विज्ञापयितुं प्रवृत्तायां माण्डूक्योपनिषदि पादचतुष्टयस्वरूपात्मसमर्पणार्थमवस्थात्रयप्रक्रिया तावत् प्रस्तुताऽस्ति ॥

(१) तत्र 'जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथम :पादः' (मां. ३) इति लोकसिद्धजाग्रदवस्था-

वन्तं शारीरात्मानम् अनूद्य तस्य सप्ताङ्गत्वकथनात् वैश्वानरसंज्ञाकरणाच्च सर्वस्यापि स्थूलप्रपञ्चस्य साधिदैविकस्य वैश्वानरशरीरत्वमुक्तमिति गम्यते । एवं च जागरितावस्थाभिमानिनः पिण्डात्मनः, तत्साक्षिभूतवैश्वानरात्मत्वम् अध्यारोपापवाददृष्ट्या हृदयंगमितं भवति ॥

वैश्वानरस्य सप्ताङ्गत्वं तु 'तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' (छां. ५–१८–२) इति श्रुत्यन्तराश्रयणादवगन्तव्यम् । अस्य वैश्वानरस्यात्मनः, सुतेजस्त्वयुक्तो **द्युलोक एव मूर्धा (१)**; विश्वरूपवान् **आदित्य एव चक्षुः (२)**; पृथग्वर्त्मसु आवहादिभेदेन वर्तमानो **वायुरेव प्राणः (३)**; सर्वगतत्वलक्षणबहुलत्वगुणयुक्त **आकाश एव सन्देहः**, मध्यमं **शरीरम् (४)**; रयिर्धनरूपा **अप एव बस्तिः**, **मूत्रसंग्रहस्थानम् (५)**; **पृथिव्येव पादौ (६)**; एतैः सह वाक्यशेषे प्रोक्त **आहवनीयोऽग्निरेव चाऽऽस्यम् (७)** – इत्येवं सप्ताङ्गानि वैश्वानरस्य ॥

तथा एकोनविंशतिमुखोऽयम् । दशेन्द्रियाणि, पञ्च प्राणाः, मनोबुद्धिरहङ्कारश्चित्तमित्यन्तःकरणचतुष्टयं च – इत्येकोनविंशतिर्मुखान्यस्य । एतैर्हि द्वारैः शब्दादीनुपलभते पिण्डात्मा । वैश्वानरस्य एतत्प्रज्ञायाः साक्षित्वात् सोऽपि एकोनविंशतिमुखः, स्थूलभुगिति चोच्यते पिण्डात्मनो वैश्वानरानन्यत्वविवक्षया । सोऽयं **वैश्वानरः** प्रथमपादः, मुख्यस्य ब्रह्मानन्यस्यात्मनः ॥

(२) एवं समनन्तरोत्तरमन्त्रे समुपवर्णितो यस्तैजसः, हिरण्यगर्भः, तस्य मनोवासनारूपा प्रज्ञा विषयः इत्यन्तःप्रज्ञः सः। तद्वासनाविशिष्टस्तु जीवः, वासनामयान् स्वान्तःस्थानेव भुङ्क्ते इत्यन्तःप्रज्ञः स्यात्; तस्य सर्ववासनाप्रपञ्चस्य साक्षी तु प्रकाशरूपायां विषयरूपायां प्रज्ञायां विषयी भवति स्वचैतन्यरूपेण प्रकाशेनेति तैजसः। स 'स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति' (बृ.भा. ४-१-१०) इति ह्यन्तःप्रज्ञत्वम्, 'यश्चायमस्मिश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्' (बृ. भा. २-५-७) इति तैजसत्वं चास्य प्रसिद्धं श्रुत्यन्तरे। अन्तःप्रज्ञश्चासौ अन्तःस्थितप्रज्ञाविषयकत्वात्। वैश्वानरस्य सविषयायाः स्थूलायाः प्रज्ञाया भोज्यत्वम्, तैजसस्य तु निर्विषयायाः सूक्ष्माया इत्यतः पूर्वः 'स्थूल भुक्'; इतरस्तु तैजसः 'प्रविविक्तभुक्' इति व्यपदिश्यते इति ज्ञेयम्॥

अत्र जागरितोपाधिकस्य साक्षिणो वैश्वानरत्वकथनं सर्वस्यापि स्थूलप्रपञ्चस्य जागरिताविनाभावात्, जागरितोपाध्युपशमे तस्यैव साक्षिणः सूक्ष्मप्रपञ्चोपाधिकतया तैजसत्वद्योतनार्थम्, सर्वपिण्डात्मनां तदनन्यत्वेनाद्वितीयत्वद्योतनार्थं च। उपाधिद्वयोपरमे च तस्यैव प्राज्ञलक्षणतृतीयपादत्वोपपादनार्थमप्येतद् भवति॥

(३) तथा ह्युत्तरस्मिन् मन्त्रे 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्' इति जाग्रत्स्वप्नप्रपञ्चयो-

रुभयोरप्यभावात् कामाभावः, द्वितीयदर्शनलक्षणस्वप्नाभावश्च 'सुषुप्तम्' इति लक्षणकथनं तृतीयावस्थाया उपपद्यते । करणानां सर्वेषामपि सुष्ठूपरमणं हि सुषुप्तत्वमिति । 'तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति' (छां. ८-४-३) इति श्रुत्यन्तरात् । अत्र ह्यवस्थायां जीवः सर्वानपि विशेषानुपाधिकृतान् हित्वा स्वरूपस्थ एव भवति 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' (छां. ६-८-१) इति श्रुत्यन्तरात् ॥

स्वप्नावस्थावर्णनावसरे यथैव पूर्वं वैश्वानरस्य तथैव तैजसस्यापि सप्ताङ्गत्वम् एकोनविंशतिमुखत्वं च श्रूयते । तत्र को वाऽऽशयः स्यात् ? न हि स्वप्ने वस्तुसन्त एव द्युलोकादयः सन्ति, उपलब्धिद्वाराणि वा ॥

बाढम्, नैव परमार्थसन्तस्तत्र लोकादयः, करणानि वा । तथापि तु वासनामयः कार्यकरणसङ्घातः, लोकादयश्च तात्कालिकाः प्रतिभासमात्रशरीरा विद्यन्त एव तत्रापि । तेन सप्ताङ्गत्वमेकोनविंशति-मुखत्वं चाभासरूपमपेक्ष्य विशेषणं न विरुध्यते । तावन्मात्रेणाप्यात्मनः पारमार्थिकं रूपम् अद्वैतमिति स्थास्यत्येव । न हि मायामयेन वासना-प्रपञ्चेन तत्साक्षिणः सद्वितीयत्वं शक्यशङ्कम्, स्वप्नदृष्टपुत्रेण सपुत्रत्व-मिव देवदत्तस्य । अत एव श्रुत्यन्तरे 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (का. २-१-४) इति जागरितदृष्टं सप्रपञ्चत्वं स्वप्ने व्यभिचरति, जागरिते च स्वप्नदृष्टं प्रपञ्चाभासोपाधिकत्वमित्यतः, तदुभयसाक्षिणम्

अहमेव स इति परमात्मानन्यत्वेनात्मानं मत्वा न शोचति इत्यवस्थाद्वयपरीक्षणेनैव परमात्मविज्ञाने परिसमाप्तिर्जिज्ञासाया उक्ता ॥

अभिप्रायान्तरमप्यत्र तर्कितुं शक्यम् । यथा हि जीवस्य जाग्रत्प्रज्ञा तत्रस्थमनःस्पन्दनमात्रा सविषयेवावभासते, एवं स्वप्नप्रज्ञापि सविषयेवावभासते; तत्रापि जाग्रद्बुद्धिरेव भवति, न तु स्वप्नबुद्धिः। तत्रापि देशकालनिमित्तसंपत्तिरबाध्यत्वं च विभाव्यते तत्र विकल्प्यमानस्वप्नान्तरदृष्ट्या। एवं च स्वस्वकाले सत्यत्वबुद्धिर्जागरितबुद्धिश्च समानैवेत्युभयोरपि स्वप्नत्वमेवेति सिध्यति। तथा चैतदभिप्रायेण सप्ताङ्गत्वस्य एकोनविंशतिमुखत्वस्य च स्वाप्नात्मविशेषणत्वेनादानमित्यपि शक्यं योजयितुम् । तथा हि संप्रदायविदां वचनम् 'स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः । भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ '(गौ.का. २-५) इति 'स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा । तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥' (गौ. का. २-३१) इति च। जागरिते दृष्टस्य विश्वस्येदं स्वप्नमायादिसरूपत्वमुक्तम् आत्मनो नित्याद्वितीयत्वावधारणार्थमेव । अयोक्तं च कार्यकारणप्रक्रियाप्रस्तावे कार्यप्रपञ्चोऽयम् उत्पत्तिस्थितिप्रलयेषु ब्रह्मात्मकतां न जहातीत्यद्वैतात्मज्ञानोपायतां जगत्सृष्टिवचनस्य । अत एव चाह भाष्यकारः "प्रतिपादितं हि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे. सू. २-१-१४) इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम् ।" (सू. भा. ३-२-४, पा. ३९७) इति । अतः सर्वमिदमनाकुलम् ॥

किमर्थं तर्हि भगवन्, सुषुप्तावस्थायाः पृथगुपादानं परीक्षणाय ?

सत्यं नास्त्येव पृथगुपादानावसरः, सम्यग्विज्ञातात्मैकत्वस्य । स्वप्नपरीक्षणेनैव द्वितीयाभावस्य परिज्ञातत्वात् । अत्यल्पमेव त्विद-मुच्यते, यतोऽन्तरेणापि स्वप्नपरीक्षणं जागरितमात्रे सर्वव्यापित्व-दर्शनादेवात्मनः सर्वविस्त्वं भवति जिज्ञासोः तथा हि श्रुतिः 'स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवति ' इति प्राणन-दर्शनादिक्रियाकर्तृत्वेनैकैकमेव रूपं य आत्मेति जानाति सोऽकृत्स्नविद् भवति – इति निन्दित्वा 'आत्मेत्येवोपासीतात्र ह्येते सर्वे एकं भवन्ति । तदेतत् पदनीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत् सर्वं वेद । यथा वै पदेनानुविन्देदेवम् ' (बृ. १–४–७) इति प्राणादिमनोऽन्तान् सर्वान् व्याप्नोतीत्यत आत्माऽयम् इति यो वेद स एव कृत्स्नवित्–इति सर्व-व्यापकत्वेनैव सर्वत्वमात्मनो व्याचष्टे । स्मृतिश्च 'सर्वं समाप्नोषि ततोऽसि सर्वः' (गी. ११–४०) इति । यस्तु नैवम् एकयैवावस्थया परीक्षितया द्वाभ्यामेव वा, सर्वत्वमनुभवितुं पारयति, तं प्रत्येष्टव्यैषा सुषुप्ति-परीक्षा । स ह्यल्पवित् कदाचित् शङ्केत यद्यप्यनात्मप्रपञ्चो मिथ्या, तथापि तत्सहचरित एवैकान्तेन भवत्यात्मा इति ॥

सुषुप्तिपरीक्षणेनापि कथमेतच्छङ्का निवर्त्येत ?

शृणु । यथैतत् तथा प्रवक्ष्यामि । सुषुप्तात्मा खल्वेवमुपवर्ण्यते 'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ' (मां. ५) इति । अत्र ह्यवस्थायां नैव किञ्चिदपि आत्मनः प्रविभक्तं विद्यते ; 'न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं

यत् पश्येत्' (बृ. ४–३–२३) इति श्रुत्यन्तरात्। तस्मात्, **एकीभूतः** सुषुप्तः; **प्रज्ञानघन एव** चायम्। न तत्र प्रज्ञानस्वरूपव्यतिरेकेण जात्यन्तराक्रान्तं वस्त्वस्ति। **आनन्दमयः** आनन्दप्रायः न हि तादृशं तृप्तस्वरूपम् अन्यत्रास्ति। तत्स्वरूपाज्ञानात्तु लोकः पुनरप्युत्थाय जागर्तीति सूचयितुं मयट्प्रत्ययः। **आनन्दभुक्,** अत्यन्तानायासरूपा हीयं स्थितिर्जीवेनानुभूयत इति कृत्वा **'आनन्दभुक्'** इति व्यपदिश्यते। न ह्यत्र भोक्तृभोगभोग्यविभागोऽस्तीति सर्वानुभवसिद्धमेतत्। तस्मात्, यथा लोके शिरस्थभारापगमे सति सुखीत्युपचर्यते तद्वदेवात्रावस्था-द्वयानुभवकृतायासापगमादेवानन्दभुगित्युपचर्यत इति युक्तम्। **प्राज्ञः** प्रज्ञप्तिश्चैतन्यमात्रम् अस्यैवासाधारणं रूपमिति **प्राज्ञः**। अस्यां ह्यवस्थायां जीवः स्वरूपभूतेनैव सर्वसाक्षिभूतेनेश्वररूपेण वर्तते इति सर्वथात्र जीवेश्वरविभागो निवर्तते इति। सोऽयं प्राज्ञस्तृतीयः पादो ब्रह्मानन्यभूतस्यात्मनः॥

**एवं सर्वथा निष्प्रपञ्चत्वे, एतद्विलक्षणं ब्रह्मणो रूपं किमवशिष्टमस्ति येन चतुर्थः पादोऽपि प्रदर्श्यते? किञ्च, कथं वाऽऽत्मनो भूतभवद्भविष्यद्रूपत्वं प्रतिज्ञायते श्रुत्या इति चित्रीयते मन्मनः॥**

नास्त्यत्र किञ्चिच्चित्रम्। यतः कारणोपाधिकमिदं रूपं प्राज्ञ-संज्ञकम्। तेनास्य निरुपाधिकं रूपं वर्णनीयमवशिष्यते। श्रुतिवाक्यशेषेण ह्येवमेवैतत् इत्यवगम्यते। **'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्।'** (मां. ६) इति वाक्यशेषः। अयमाशयः। एष एव हि साक्षी स्वरूपादप्रच्युतः प्रबोधे स्वप्ने च सर्वस्यापि भेदजातस्य साधिदैविकस्येशिता, तदधीनस्वरूपस्थितिव्यापार-

कत्वात् सर्वपिण्डात्मनां कर्तृभोक्तृरूपेण स्थितानां इति **सर्वेश्वरः**, एष एव च **सर्वज्ञः**, सर्वभेदावस्थज्ञातॄणां जागरिते, तदाभासानां च स्वप्ने, एतदनन्यत्वात्, एतच्चैतन्याभासेनैव स्वस्वविषयज्ञातृत्वं सर्वेषां करणानाम् । एष एव **अन्तर्यामी** ; तत्तत्कार्यकरणसङ्घाते सर्वभूताना-मात्मा सन् नियन्तापि । सर्वस्यापि **प्रभवाप्ययौ** जगतो जन्मप्रलय-कारणमप्येष एव । तथा हि श्रुत्यन्तरे 'यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' (कौ॰ ३–३) इति सविषयेन्द्रिय-लक्षणस्य सर्वस्यापि प्रपञ्चस्य प्राणापरसंज्ञके प्राज्ञे एवैकीभावो भवतीति विज्ञायते । तदेवं कारणोपाधिकमिदं रूपम् इति निरुपाधिकं चतुर्थ-पादात्मकं पारमार्थिकं रूपं दर्शयितव्यमवशिष्यते ॥

यत्पुनः पृच्छसि कथं निष्प्रपञ्चस्य भूतभवदादिरूपत्वमिति । तत्रेदं वच्मि शृणु । न खल्वयमेकीभावः सुषुप्ते एवावस्थायां भवत्यात्मना जीवस्य जगतो वा । 'तत्त्वमसि' इति श्रुत्या ब्रह्मात्मभावस्यानवस्था-विशेषनिबन्धनत्वश्रवणात् । 'वाचारम्भणं विकारो नामधेयम्' (छां.) इति सर्वस्यापि विकारजातस्य वागारब्धनामधेयमात्रत्वश्रवणात् । 'ब्रह्मैवेदं विश्वम्' (मुं. २–२–११), 'आत्मैवेदं सर्वम्' (छां. ७–२५–२) इति च ब्रह्मात्मैकस्वरूपत्वावधारणाच्च सर्वस्य जगतः ।

तथापि तु स्वप्नजागरितयोस्तु अविद्याकल्पितप्रपञ्चतदाभाससंपर्काद्विभाव्यमानं पररूपापत्त्याभासम् अपेक्ष्य, तस्याप्युपशमात् सुषुप्तौ स्वात्मनि प्रलीन इव भवतीत्यतः 'एकीभूतः' इत्युच्यतेऽयमात्मा। यथोक्तपररूपत्वाभासमपेक्ष्यैव तु जाग्रत्साक्षिणो वैश्वानरसंज्ञत्वम्, स्वप्नसाक्षिणस्तैजससंज्ञत्वं च सुषुप्तसाक्षिणश्च प्राज्ञत्वव्यपदेश इत्यनवद्यम् ॥

**यद्येक एव साक्षी चित्स्वरूपः सर्वत्र, कथं तर्हि भगवन् तत्रात्मनः सुषुप्तेऽज्ञत्वम् ? न हि तत्र किञ्चिज्ज्ञायते केनापि । अपि च यदि तत्रेश्वरत्वमेव जीवस्यापि, कथं नित्यज्ञानस्वरूपस्यापि तस्य अकिञ्चिज्ज्ञत्वं तत्र ? 'साक्षी चेता केवलो निर्गुणश्च' (श्वे. ६-११) इति साक्षाद्द्रष्टृत्वं चैतन्यस्वरूपत्वं च खलु श्रूयते देवस्य ॥**

अहो विचारनिपुणस्यापि विमूढत्वम् ! एतावत्पर्यन्तं व्यवहारं परमार्थं च विभज्यैव विचारे प्रवृत्तौ आवाम् । सत्यानृते मिथुनीकृत्यैव हि जीवत्वमात्मनः प्रकल्पितम् । तत्राविद्याकल्पितस्यैव जीवस्य शरीरेन्द्रियसंघाताभिमानवशात् ज्ञातृत्वमिति तस्य ज्ञत्वम् अज्ञत्वं वा भवेत्, न नित्यचैतन्यस्वरूपस्य साक्षिणः इति न साक्षिभूतेश्वरस्य अवस्थात्रये कुत्रचिदपि अज्ञत्वं शक्यशङ्कम् । ज्ञातृरूपस्य तु जीवस्य स्वप्नजागरयोरस्ति विशेषज्ञानमुपाधिकृतम् तदाभासो वा; सुषुप्ते पुनस्तस्येश्वरेणैकीभावात् न विशेषज्ञानमुपपद्यते । तदुक्तं श्रुत्यन्तरे 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् ।' (बृ. ४-३-२१) इति । साक्षी तु प्राज्ञः, प्राज्ञत्वादेव सुषुप्तिम् स्वानुभवेन व्याप्नोत्येवेति नैव तत्रापि तस्याज्ञत्वं विद्यते । तदप्युक्तं श्रुत्यन्तरे

'यद्वै तन्न विजानाति विजानन् वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. ४–३–३०) इति ॥

ननु भगवन्, सर्वस्यात्मा ब्रह्मैवेत्युक्तं भगवता ; सर्वेऽपि वेदान्ता ब्रह्मात्मैकत्वमेव प्रतिपादयितुं प्रवृत्ता इति च । तत्र किमिदमुच्यते जीवस्य सुषुप्तौ विशेषविज्ञानं नास्ति, ईश्वरस्य तु विज्ञानस्वरूपमस्तीति ?

किमेवं विस्मरसि भूयोऽपि मयोक्तम् ? नन्विदानीमेवोक्तं मया जीवोऽयमहंप्रत्ययविषयः, साक्षिण ईश्वरात् तत्त्वेन वा तदन्यत्वेन वा निर्श्चेतुमशक्यरूपः इति । येन रूपेण जीवत्वेन विभाव्यते, तद् रूपमधिकृत्यावोचं जीवस्य विशेषविज्ञानं जाग्रत्स्वप्नयोरस्ति सुषुप्ते तु नास्तीति । येन तु साक्षिरूपेण तस्यैकत्वमेव साक्षिणा, तस्य मिथ्याज्ञानकल्पितो ज्ञानाज्ञानविशेषो नास्त्येवेति त्विदानीमुच्यते । तत्र किं विषमं पश्यसि ?

इदानीं लब्धस्मृतिरस्मि । जीवत्वं मम मिथ्याकल्पितमेव, परमात्मैकत्वं तु नित्यदाऽस्त्येवेति । यत्तूक्तं सुषुप्तात्मनः कारणोपाधिकत्वमिति तत्कथमिति जिज्ञासे । तदेव विशदयतु भगवानिति प्रार्थये ॥

तथास्तु । अस्य कारणत्वं कीदृशमिति तावद् विवेचयिष्यावः । स्मरसि यथाहमवोचम् जाग्रत्प्रपञ्चस्य जाग्रदवस्थायामेव लब्धप्रतीतित्वं तत्साक्षिचैतन्यव्यतिरेकेणाभावश्चेति । साक्षी तु तद्व्यतिरेकेऽपि स्वप्ने सुषुप्तौ चाव्यभिचरितस्वरूपोऽस्तीति च । इदमपि मा विस्मर यदवोचं पुरा जाग्रत्स्वप्नयोरुभयोरपि तत्तदुचितदेशकालनिमित्तसंपत्तिरस्तीति । एतेन न वास्तविकः कश्चित् संबन्धोऽस्ति देशतः कालतो वा तयोरवस्थयो-

स्तदन्तर्भूतप्रपञ्चयोर्वा – इत्यप्युक्तमेव भवति । तस्मात् चित्तं चित्तदृश्यजातं च यदुपलभ्यते स्वप्ने जागरिते वा तस्य सर्वस्यापि तत्तदवस्थाद्रष्टृभूतस्यैव साक्षिणः साक्ष्यत्वात् तदव्यतिरिक्तं तत्रैव मायया भाति, न तु जाग्रत्स्वप्नाख्ययोरवस्थयोः, तदन्तर्गतदृश्ययोर्वा प्रातिस्विककालदेशादिमतोः परस्परं कार्यकारणभावोऽस्ति परमार्थतः । उभयाधारस्य देशकालादेरन्यस्याभावात् । यथोक्तम् 'स्वप्नदृक्चित्त-दृश्यास्ते न विद्यन्ते ततः पृथक् । तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्त-मिष्यते ॥' (गौ. का. ४-६४), 'जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् । तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ॥' (गौ. का. ४–६६) इति । तदेवं स्वप्नजागरितयोरेव तावत् परस्परकार्यकारणभावसंबन्धेऽ-नुपपन्ने, किमु वक्तव्यं निरस्तसर्वदेशकालादिविशेषे सुषुप्ते कार्यत्वं कारणत्वं वा अवस्थान्तरं प्रति नैव शक्यशङ्कमिति ; तदेवं वीक्ष्यमाणे यद्यप्यवस्थानां परस्परसंबन्धो सर्वथा दुर्भण एव, तथापि अज्ञो जनः, स्वरूपविवेकाभावादेवात्मनि शरीरेन्द्रियादिलक्षणोपाधितन्त्रतां कल्पयित्वा जाग्रत्स्वप्नसुषुप्ताख्यमवस्थात्रयानुभवं संततमिवाध्यारोपयति । तथा जाग्र-त्स्वप्नयोः कार्यकारणभावं प्रकल्प्य जाग्रत्प्रपञ्चस्य सत्यतां स्वप्नप्रपञ्चस्य च तद्वासनामयत्वान्मिथ्यारूपतां च कल्पयति । सुषुप्तौ तु कञ्चित् कालं उपरतकार्यकरणव्यापारो विश्रम्य पुनरपि जागर्मीत्यभिमन्यते । तमेवं नैसर्गिकाविद्यया अहंप्रत्ययविषयमात्मानं मन्यमानं प्रतिबोधयितुकामा श्रुतिः, यथावर्णितम् अवस्थात्रयप्रक्रियामवलम्ब्य यथैव जाग्रदवस्थायां तस्य वैश्वानरतां, स्वप्ने च तैजसताम्, तथैव सुषुप्तौ प्राज्ञतामपि विज्ञाप्य बोधयति 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः

सर्वस्य प्रभवाप्ययौ हि भूतानाम्' (मां. ६) इति । तदेवं यथाध्यारोपितप्राज्ञत्वस्य सुषुप्तेऽद्वैतस्यैव सतः जाग्रति सप्रपञ्चत्वेनानुभवमपेक्ष्य, तस्मिन्नेव प्राज्ञे कारणत्वमध्यारोपयति 'प्रभवाप्ययौ हि भूतानाम्' इति । उदाहृता च श्रुतिः स्वापप्रबोधयोः प्रलयप्रबोधौ विज्ञापयन्ती । तदेतदालक्ष्यावोचं कारणोपाधिकमिदं रूपम् इति । एतद्दृष्ट्यैव अद्वितीयात्मभावेनैव स्थितस्य जाग्रति सप्ताङ्गत्वम् एकोनविंशतिमुखत्वं चोच्यते; तदपेक्षयैव च भूतं भवद् भविष्यदिति सर्वं स एव परमात्मा इत्युक्तमप्युपपद्यते । नास्त्येव तु कारणान्तरं तं प्रतीति प्राज्ञ एव यथोक्ताध्यारोपदृष्ट्या सर्वेषां भूतानामाकाशादीनाम्, जीवविद्यानां च भूतानां स्थावरजङ्गमलक्षणानां योनित्वं प्रभवाप्ययत्वं च श्रुत्युक्तमवकल्पते ॥

एवं तर्हि भगवन्, जाग्रत्स्वप्नयोः प्रतिभासमात्रत्वात् जगतो मिथ्याप्रतिभासमात्रत्वात्, सुषुप्तात्मनश्च अद्वितीयत्वान्निर्विशेषत्वाच्च, वैश्वानरत्व-तैजसत्वयोर्न कार्यत्वम्, प्राज्ञस्य च न कारणत्वम् इति प्राप्तम् ॥

सत्यमेवमेव प्राप्तम् । अत एवावोचम् अविद्यमानमपि लोकबुद्धिमनुसृत्य विद्यमानमिवोपदेशार्थम् अध्यारोप्य, उपदेशान्ते तदप्यध्यारोपितम् अपवदन्ति वेदान्ता इति । तथा च वार्तिककाराः कार्यरूपं कारणरूपं च मिथ्येति स्पष्टमेवाहुः 'कार्यात्मा कारणात्मा च द्वावात्मानौ परात्मनः । प्रत्यग्याथात्म्यमोहोत्थौ तन्नाशे नश्यतः स्वयम्' (बृ. वा. २-४-२४२) इति ॥

कथं तर्हि मिथ्याभूतयोरेव कार्यकारणभावः ?

नैष दोषः, कार्यकारणव्यवहारस्यापि मिथ्यात्वात् । न हि परमार्थदृष्ट्या कार्यकारणभावः कुत्रापि उपपद्यते । अद्वितीये ब्रह्मात्मनि

जीवजगदीश्वरविभागस्याभावादेव ; कस्यापि व्यवहारस्य तस्मिन्नसम्भवाच्च । तथा हि श्रुतिः 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च' (का. १-२-१४) इति कार्यकारणसंबन्धमात्मन्यपवदति । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना आत्मैकत्वविद्याविषये सर्वमपि व्यावहारं वारयति च ॥

## शास्त्रस्य मिथ्यावस्तूपदेशकत्वेऽपि न प्रामाण्यहानिः

२२. कथं तर्हि प्रमाणभूतस्य वेदस्य मिथ्याभूतकार्यकारणभावोपदेशः ?

नैष दोषः । सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । व्यावहारिकं सत्यत्व मनूद्यैव अयम् अध्यारोपदृष्ट्या कार्यकारणभावोपदेशः प्राज्ञस्य च कारणत्वोपदेशः ॥

कथं पुनरद्वैतस्य प्राज्ञस्य कारणत्वोपदेशः ? न हि नित्यं निरवयवं च वस्तु, कार्यत्वेन परिणमते च -- इत्युपपद्यते ॥

शृणु यथेदमुपपद्यते । अत्रेदं भगवतो भाष्यकारस्य वाक्यमुदाहरणमर्हति – 'सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य 'माया', 'शक्तिः', 'प्रकृतिः' इति च श्रुतिस्मृत्योरभिलप्येते । ताभ्यामन्यः सर्वज्ञ ईश्वरः 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छां.) इति श्रुतेः" (सू. भा. २-१-१४) इति ; 'न हि अविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते । न हि

तिमिरोपहतनयनेन अनेक इव चन्द्रमा दृश्यमानः, अनेक एव भवति। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्याम् अनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते। पारमार्थिकेन च रूपेण सर्वव्यवहारातीतम् अपरिणतम् अवतिष्ठते। वाचारम्भणमात्रत्वाच्च अविद्याकल्पितस्य रूपभेदस्येति न निरवयवत्वं ब्रह्मणः कुप्यति' (सू. भा. २–१–२७) इति च॥

तदेवं प्राज्ञस्य मायाव्यपाश्रयं कारणत्वमिति 'प्रभवाप्ययौ हि भूतानाम्' इति न विरुध्यते॥

## ईश्वरस्य मायोपाधिकत्वेऽपि नेश्वराभावप्रसङ्गः

२३. तर्हि प्राज्ञस्य यदेतद्वर्णितम् सर्वेश्वरत्वं सर्वज्ञत्वं सर्वकारणत्वं च श्रुत्या, तदेतत् सर्वं व्यावहारिकमेवेति जातम्। तथा चेश्वराभावप्रसङ्गः – इति महदिदमनिष्टं वैदिकानामास्तिकानाम्। अपि च यदुपदिश्यते, सर्ववेदान्तेषु ब्रह्मात्मैकत्वं नाम, तस्याप्यभावप्रसङ्गः; ब्रह्मण एवेश्वरत्वात्, तस्य चेश्वरस्य मिथ्यात्वात् इति मूले कुठारप्रहारोऽयं स्यात्॥

न स्यात्। उपाधेर्मायिकत्वेऽपि उपहितस्याभावप्रसङ्गस्य दुर्वचत्वात्। न हि मायाविप्रसारिता माया मिथ्या, आभासमात्रम् – इत्यनेन मायाविनोऽपि मिथ्यात्वं प्रसजति। एतदप्युक्तं भाष्यकारैरेव 'एवमविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति। व्योमेव घटकरकाद्यनुरोधि; स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये। तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्ष-

मेव ईश्वरस्य ईश्वरत्वम् सर्वज्ञत्वम् सर्वशक्तित्वं च । न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादि व्यवहार उपपद्यते ॥ ' (सू.भा. २–१–१४, पा. २०१) इति । न हि घटापवरकाद्युपाधिवशाद् विभाव्यमान आकाशे भेदव्यवहारो मिथ्या – इत्युक्त्या आकाशस्यापि मिथ्यात्वमुक्तं भवति । न च परमार्थदृष्ट्या ईश्वरत्वादिकं नास्तीति प्रतिज्ञया व्यावहारिकस्यापीश्वरेशितव्यभेदस्याभावः प्रसज्यते । अत एवावोचं (पा. ३७) निरुपाधिकं रूपं वर्णनीयमवशिष्यत इति ॥

## तुरीयात्मोपदेशः

२४. यदि निरस्तसर्वोपाधिनिर्विशेषमेव च तद्रूपम्, तर्हि कथं वा वर्णनीयं स्यात् तत् ? सर्वं हि वस्तु द्रव्यत्वगुणत्वादिरूपेण केनचिद् विशेषेणान्वितमेव शक्यवर्णनं लोके दृष्टम् ॥

एतत्तु सर्वप्रथममेवोक्तं मया, अविद्यानिवर्तनेनैव वेदान्ताः स्वयंसिद्धम् आत्मस्वरूपं समर्पयन्तीति । तथा चेहापि श्रुतिः 'नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्य[1]मव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ' (मां. ७) इति ॥

नेह पश्यामि वचनम् अविद्याकल्पितमिदम् इति । केवलम् ' नान्तःप्रज्ञम् ' इत्यादिना निषेधमात्रं श्रुतिगोचरं भवति । न च विज्ञायते कथं निषेधमात्रेण चतुर्थः पादोऽधिगन्तव्य इति ॥

1. 'अदृष्टम्' इति पाठान्तरम् ॥

स्मर्तुमर्हसि सोम्य, यदवोचं वेदान्ता निष्प्रपञ्चमेव ब्रह्मात्मानम् अध्यारोपापवादाभ्यां प्रपञ्चयन्तीति । तद्यथा अवस्थापरीक्षणायां तावत्, शारीर आत्मा आत्मानं प्रपञ्चमध्यस्थानां कर्तृभोक्तृलक्षणानामनेकेषाम् एकतमं मन्वानः स्वप्नजागरितादिसंसारानर्थम् अनुभवतीव । तं प्रतिबोधयितुं प्रवृत्ता श्रुतिः 'जागरिते तावत् त्वं सर्वप्रपञ्चसाक्षी वैश्वानर एवासि' इति वैश्वानरत्वाध्यारोपेण शारीरत्वाद् व्यावर्तयति । तदनन्तरं स्वप्ने केवलवासनाविशिष्टं विविधमिथ्याभावदर्शिनमात्मानं मन्वाने तस्मिन् तैजसत्वाध्यारोपेण वैश्वानरत्वमपि व्यभिचरद्रूपं दर्शयति । तदनु च सुषुप्तौ उपाविकृतविशेषज्ञानाभावात् अज्ञमेवात्मानं मन्वाने तस्मिन् प्राज्ञत्वाध्यारोपेण तैजसत्वमपि न स्वाभाविकमित्यादर्शयति । तत ऊर्ध्वं सुषुप्तस्य पुनरुत्थानदर्शनात् प्राज्ञरूपत्वमपि कादाचित्कमित्येव स्यात् इति मन्वानं प्रति अवस्थात्रयपरिच्छिन्नत्वमप्याविद्यकमेवेति दर्शयन्ती परमार्थरूपमेव तद्रूपं विज्ञापयति 'नान्तःप्रज्ञम्' इत्यादिना । तस्मात् वैश्वानरत्वाद्यध्यारोपः शारीरत्वादिबुद्ध्यपनयार्थः, तैजसत्वाद्युपदेशश्च पूर्वपूर्वसोपाधिकरूपनिषेधार्थश्च । 'नान्तःप्रज्ञम्' इत्यादि त्वात्मनोऽवस्थावत्त्वादिसर्वविशेषरूपप्रतिषेधेन 'अयमात्मा ब्रह्म' (मां. २) इति यत् प्रतिज्ञातम्, तदधिगमनार्थम् इति सिद्धम् ॥

## प्रतिषेधवाक्यकृत्यविचारः

२५. कथं पुनरन्तःप्रज्ञत्वादिप्रतिषेधमात्रादात्मस्वरूपप्रतिपत्तिः ? न हि 'नायं सर्पः' इति प्रतिषेधमात्रादेव रज्जुप्रतिपत्तिर्भवेत्, 'रज्जुरेषा' इति खलु विधिमुखेनाप्युपदेशेन भाव्यम् ॥

जातित्वद्रव्यत्वाद्यभावेन सर्वशब्दप्रवृत्तिनिमित्ताभावादेव । नैतद्विधिमुखेनोपदेश्यं भवति । अविषयत्वाच्च । अत एव हि श्रुतिः– 'यद्वाचाऽनभ्युदितम्'(के. १–४), 'यन्मनसा न मनुते ' (के.१–५)– इति च तस्य वाङ्मनसयोरगोचरत्वमेव ब्रूते । सुप्रसिद्धत्वाच्च । अत्यन्तं प्रसिद्धमेव हि ब्रह्म सर्वस्यात्मत्वेन । देहेन्द्रियमनोविज्ञानाहङ्कारेषु तु तैस्तैर्ज्ञानभूमिकाविशेषस्थैर्जिज्ञासुभिर्वादिभिश्चाध्यारोप्यते आत्मत्वमिति तत्तदपवादेन यथायथमुपदिश्यते श्रुतिभिः । अत एव ह्यात्मविज्ञान-जनने न यत्नः क्रियते, आत्मबुद्धेरपि देहादिषु प्रसिद्धत्वादेव । नाप्यात्मसिद्धौ व्याप्रियन्ते वेदान्ताः ; ज्ञातृरूपेण तस्यापि प्रसिद्धत्वा-देव । अत एव हि श्रुतिः ' येनेदं सर्वं विजानाति तं केन विजानी-याद् विज्ञातारमरे केन विजानीयात् ' (बृ. २–४–१४) इति च स्वयंविज्ञातृस्वरूपस्य विज्ञानाविषयत्वं तद्विषयविज्ञानजनककरणाभावं चोद्घोषयन्ती ॥

**कथं तर्हि 'अयमात्मा ब्रह्म' इति माण्डूक्ये एव ब्रह्मण आत्मत्वविधानम्, 'तत्त्वमसि' इति च छान्दोग्ये आत्मनः सद्ब्रह्मत्वविधानं च ? कथं च 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म' – इत्यादयो विधि-मुखा निर्देशाः ?**

इह माण्डूक्ये तावत् यदेतद् भूतं, भवद्, भविष्यत्, यच्चान्यत् त्रिकालातीतं तत्सर्वमोङ्कार एवेति प्रतिज्ञाय ब्रह्मणोऽपि 'सर्वं ह्येतद् ब्रह्म' इति तदभिन्नत्वेनानूदितत्वात् परोक्षं ब्रह्म इति प्राप्ते प्रत्यक्षतो विशेषेण निर्देशार्थं वचनम् ' अयमात्मा ब्रह्म ' इति । नेदं ब्रह्म

परोक्षाभिहितं अप्रसिद्धमेव यत्किञ्चिदिति मन्तव्यम्, यतोऽयमात्मैव ब्रह्म इति । स चासावाऽऽत्मा न जाग्रदादिपरिच्छिन्नत्वेन विभाव्यमानः संसारी, किं तु सर्वोपाधिपरिच्छेदविनिर्मुक्तं ब्रह्मैवेति परिकल्पितरूपाप-वादेनेह पारमार्थिकं तत्स्वरूपं चतुर्थपादत्वेन समर्प्यते 'नान्तःप्रज्ञम्' इत्यादिना । छान्दोग्येऽपि त्वंपदवाच्यस्य श्वेतकेतोः स्वरूपप्रति-बोधनार्थं प्रवृत्तः पिता अद्वितीयसद्ब्रह्मणो तेजआदिरूपेण जगद्रूपापत्तिं तस्मिन् ब्रह्मणो जीवरूपेण प्रवेशं चोक्त्वा सुषुप्त्युपन्यासादिभिर्जीवत्वाप-नयनमेव करोति 'तत्त्वमसि' इति । तस्मात् 'अहं ब्रह्मेति' न विधिमुखेन ब्रह्मस्वरूपवर्णनम्, अहंत्वविशिष्टस्य ब्रह्मत्वविधानं वा; किं तर्हि, अविद्या-कृतदेहाद्युपाधितद्धर्माध्यासेन प्राप्तदेहाद्यहंबुद्धेः, परमार्थात्मबुद्ध्याधानेन निवर्तनमेव । यथोक्तं शारीरकभाष्यकारेण ' देहेन्द्रियसङ्घाते आत्म-बुद्धिः, आत्मन्येवाऽऽत्मबुद्ध्या पश्चाद्भाविन्या 'तत्त्वमसि' इत्यनया यथार्थबुद्ध्या निवर्त्यते ' (सू. भा. ३-३-९, पा. ३८२) इति । यत्पुनः शङ्कसे कथं पुनर्विज्ञानमानन्दम्—इत्यादिविधिमुखोपदेशनमिति, तत्र बृहदारण्यकभाष्येणैवोत्तरं दास्यामि, " अध्यारोपितनामरूप-कर्मद्वारेण ब्रह्म निर्दिश्यते ' विज्ञानमानन्दं ब्रह्म ', ' विज्ञानघन एव ', 'ब्रह्म', 'आत्मा' इत्यादिशब्दैः । यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषैः, तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम्; तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण 'नेति नेति' इति निर्देशः ॥ " (बृ. भा. २-३-६, पा. ७५५) इति ॥

**यदि न केनापि शब्देन निर्देष्टुं शक्यं ब्रह्म, अध्यारोपितनामरूपाद्यसत्योपायेनैव च बोध्यते कथमविद्यमानेन संबन्धेन शब्दबोध्यत्वसंभव इति न विजानाम्यहम् ॥**

अत्रोक्त एव परिहारो मया 'तत्त्वमसि' इत्यादिवाक्यैरपि कल्पितार्थप्रतिषेधेनैव बोध्यते परमार्थवस्तु 'रज्जुरेवायं सर्पः' इतिवत् इति । उक्तं हि **सुरेश्वराचार्यैः** – 'लक्षणं सर्पवद्रज्ज्वाः प्रतीचः स्यादहं तथा । तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि तदाश्रयात्' (नै. सि. ३–२७) इति । यत्तु पृष्टं त्वया कथं पुनः स्वाभिधेयासंबद्धाः शब्दाः कथमभिधेयं बोधयन्तीति तत्राप्याहुः **सुरेश्वराचार्याः** – "शयानाः प्रायशो लोके बोध्यमानाः स्वनामभिः । सहसैव प्रबुध्यन्ते यथैवं प्रत्यगात्मनि ॥ न हि नाम्नास्ति संबन्धो व्युत्थितस्य शरीरतः । तथापि बुध्यते तेन यथैवं तत्त्वमित्यतः ॥" (नै. सि. ३–१०५, १०६) इति ॥

**ननु भगवन्, लोके सर्पस्य विद्यमानत्वात्, तदध्यारोपो रज्ज्वामित्यपि युज्यते । इह तु अद्वैते ब्रह्मणि दुःखित्वाभावात्, तदन्यस्य च संसारदुःखवतोऽभावे कस्य निषेधः स्यात् ? अभ्युपगम्य विधिमुखवाक्येषु प्रतिषेधार्थत्वम् इदमुक्तं मया । सर्वथापि निषेधमुखेनैव वाक्यगम्यं ब्रह्म इत्यत्र तु को वा संबन्धो शब्दस्य च परमात्मनश्च ? न हि कश्चन संबन्धोऽस्ति शब्दस्य तदभिधेयत्वेनेष्टब्रह्मात्मनश्चेति ॥**

अविद्याध्यारोपितनामरूपादिद्वारैव निर्देशनं विधिमुखेषु वाक्येषु – इत्युक्तं मया । तत्र लोके यथा अविद्याध्यारोपितनामरूपादिप्रयुक्तभ्रमापोहाय वाक्यप्रवृत्तिः, तथा शास्त्रवाक्यस्यापीति न किञ्चिद् विरुध्यते । यथोक्तम् 'अविद्यारोपितदुःखित्वभ्रमापोहार्थत्वात् । आत्मनि

प्रकृतसङ्ख्यापूरणप्रमापोहवत् ' (बृ. भा. १-४-७, पा. ६५८) इति । निषेधमुखेष्वपि वाक्येषु अध्यारोपितनिवृत्त्यर्थत्वं न दण्ड-वारितम् । यत्पुनः शङ्कसे सम्बन्धाभावः शब्दार्थयोरिति, अत्रोच्यते । विद्यत एव दृष्टान्तो यथा अर्थासंबद्धोऽपि शब्दो बोधनिमित्तो भवति । यथोदाहृतं नैष्कर्म्यसिद्धिकारेण 'यथा स्वापनिमित्तेन स्वप्नदृक् प्रति-बोधितः । करणं कर्म कर्तारं स्वाप्नं नैवेक्षते स्वतः ॥ अनात्मज्ञस्तथैवायं सम्यक् श्रुत्यावबोधितः । गुरुं शास्त्रं तथा मूढं स्वात्मनोऽन्यं न पश्यति ॥ ' (नै. ४-३६, ३७) इति । न हि वास्तविकेनैव वृत्तेन आत्मसंबद्धं व्याघ्रगर्जितादिनिमित्तं प्रतिबोधकमस्ति । तथापि तेनैव निमित्तेन प्रतिबुध्यते स्वप्नदृगिति दृष्टं लोके । एवम् असद्रूपेणापि शब्देन आत्मना असंबद्धेनैवायम् अविद्यास्वप्नो निवर्त्यत इत्यनवद्यम् ॥

अथ कथं 'नान्तःप्रज्ञम् न बहिष्प्रज्ञम्' इत्यादिना अवस्थात्रयगतात्मा-न्यत्वकथनम्, तदपेक्षया चतुर्थत्वव्यपदेशश्च ? न हि यदात्मस्वरूपमेव प्रतिपिपादयिषितं तस्य तत एवान्यत्वं निर्धार्यत इति समञ्जसं स्यात् ॥

नायं दोषः । अस्य शब्दस्य वैलक्षण्यपरत्वात् । न ह्यत्र अवस्था-त्रयात्मभ्योऽन्यत्वं विवक्षितम्, किं तर्हि कल्पितान्तःप्रज्ञत्वादिप्रतिषेधेन अवस्थावत्त्वेन विभाव्यमानस्यैव तत्तदवस्थाराहित्यमसंसारित्वं च प्रतिपिपादयिषितम् । अध्यारोपितावस्थावत्त्वस्यैव परमार्थात्मस्वरूप-प्रतिपत्तिद्वारत्वात् । तदुक्तम् 'सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूप-प्रतिपत्तिवत् त्र्यवस्थस्यैव आत्मनस्तुरीयत्वेन प्रतिपिपादयिषितत्वात्, 'तत्त्वमसि' इतिवत् । यदि हि त्र्यवस्थात्मविलक्षणं तुरीयम् अन्यत्,

तत्प्रतिपत्तिद्वाराभावात् शास्त्रोपदेशानर्थक्यं शून्यतापत्तिर्वा ' (मां. भा. ७, पा. १८६) इति । अन्तःप्रज्ञत्वादीनामात्मत्वप्रतिषेधस्तु न परमार्थात्मनोऽन्यत्वं तेषामभिप्रेत्य, कथं तर्हि लोकसिद्धमनूद्यैव । एतदप्युक्तं सूत्रभाष्यकारैः प्रसङ्गान्तरवारणाय "यश्चेदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः 'नासम्भवात्' इत्यादिना, तत्रायमभिप्रायः – नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये, एकस्मिन्, असङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् । तदात्मैकत्वप्रतिपादनपरैर्वाक्यैः, न्यायोपेतैः, द्वैतवादप्रतिषेधैश्च अपनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति ; जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येव अविद्याकल्पितं लोकप्रसिद्धं जीवभेदम्' (सू. भा. १–३–२०, पा. ११५) इति । तुल्यन्यायेनात्रापि अन्तःप्रज्ञत्वादीनामध्यारोपितानाम् अनूद्यप्रतिषेधः, चतुर्थस्य तु परमार्थात्मनस्तदन्यत्वप्रतिपादनं चेत्यवधेयम् ॥

ननु च भगवन्, कथं तर्हि 'स आत्मा स विज्ञेयः' इति आत्मविषयकविज्ञानविधानम् ? तेन हि तुरीयमप्यात्मानं विज्ञायैव प्राप्नुयात् इति गम्यते । विज्ञानं चात्रोपासनं स्याद् वाक्यज्ञानाभ्यासरूपम् । तदुक्तं च केनचित् – आत्मतत्त्वं शास्त्रतो विज्ञाय तदेव निरन्तरादरसत्कारपूर्वकं दीर्घकालमुपासीनस्यात्मदर्शनप्राप्तिर्भविता – इति । अथवा न केवलं वाक्यज्ञानमात्मानमवगमयितुमलम्, किं तु तदभ्यासादेव कालेन तुरीयात्मा विज्ञायते इत्यपि केचित् । एवमपि हि केचिद् वदन्ति उपासनेन निदिध्यासनाख्येनात्मविषयं विशिष्टं विज्ञानान्तरं भावयेत्, तेनात्मा ज्ञायते ; अविद्यानिवर्तकं च तदेव, न वाक्यजनितं ज्ञानम् – इति ॥

मैवं मंस्थाः । कर्तव्यान्तरानवशेषात् । न ह्यध्यारोपितान्तःप्रज्ञत्वादिनिवृत्तौ, अद्वितीयात्मावगमे प्रतिबन्धान्तरमवशिष्यते, येन किञ्चित् कर्तव्यान्तरमप्यन्विष्येत । तदुक्तम् – 'रज्जुरिव सर्पादिभिर्विकल्प्यमाना स्थानत्रयेऽपि आत्मा एक एवान्तःप्रज्ञत्वादित्वेन विकल्प्यते यदा, तदा अन्तःप्रज्ञत्वादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेव आत्मन्यनर्थप्रपञ्चनिवृत्तिलक्षणफलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम्' (मां. भा. मं ७, पा. १८६) इति । अपि च शरीरेन्द्रियमनःसंघातलक्षणोपाधिं विना प्रमातृप्रमाणव्यवहारस्य कर्तृभोक्तृव्यवहारस्य वा अनुपपत्तेः, कथङ्कारम् अन्तःप्रज्ञत्वादिनिवृत्त्यनन्तरमपि प्रमाणप्रवृत्तिः साधनान्तरे प्रवृत्तिर्वा अवकल्पेत ? एतदप्युक्तम् 'अन्तःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमातृत्वादिभेदनिवृत्तेः' (मां. भा. मं. ७) इति ॥

कथं तर्हि 'अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यम्' इति निरस्तसर्वप्रमाणगोचरत्वे तुरीयात्मनि 'स आत्मा स विज्ञेयः' इति विज्ञेयत्वोपदेशः ?

प्रतीयमानपादत्रयात्मवैलक्षण्यात् 'स आत्मा स विज्ञेयः' इत्यवधारयति । 'विज्ञेयः' इति तु भूतपूर्वगत्या, न हि ज्ञाते प्रमाणप्रमेयव्यवहारोऽवशिष्यत इत्यवोचम् ॥

ननु च भगवन्, 'सोऽयमात्मा अध्यक्षरमोङ्कारः' इति तुरीयोपदेशानन्तरमप्योङ्कारप्रतिपादनं दृश्यते । तेनेदमात्मनस्तुरीयस्योङ्कारालम्बनत्वेनोपासनाविधानार्थम् इति गम्यते ॥

न । यथोक्तन्यायेन ज्ञानानन्तरं साधनान्तरावशेषासम्भवात् । 'सर्वं ह्येतद् ब्रह्म' इति प्रतिज्ञातस्य सोपपत्तिप्रतिपादनानन्तरं 'अध्यक्षरमोङ्कारः' इत्यारम्भस्तु अभिधानाभिधेयविभागरहित एवायमात्मा ओङ्काराख्यः – इत्यवगमनार्थम् । 'पादा मात्रा मात्राश्च पादाः' इति व्यतिहारेणोपदेशाच्चैतदेवमित्यवगम्यते । 'एवमोङ्कार आत्मैव संविशत्यात्मनैवात्मानं य एवं वेद' इत्यवधारणपूर्वकम् आत्मन्येवात्मरूपेण संवेशनोपदेशाच्च । अस्ति चात्र भाष्यकारोक्तिः 'एकत्वप्रतिपत्तेश्च प्रयोजनम् अभिधानाभिधेययोरेकेनैव प्रयत्नेन युगपत् प्रविलापयन् तद्विलक्षणं ब्रह्म प्रतिपद्येतेति' (मां. भा. मं. २, पा. १७८) इति । तत्परमगुरूणां श्रीगौडपादाचार्याणामुक्तिश्च 'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः । ओङ्कारो विदितो येन स मुनिर्नेतरो जनः' (गौ. का. १-२९) इति ॥

ननु च भगवन् अत्र 'आप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद' (मं. ७) इत्याद्यप्यवान्तरफलं श्रूयते मात्राविदः । तस्मात्, उपासनापि काचिद् विवक्षिता स्यादित्युन्नीयते । कारिकापि भवति 'अकारो नयते विश्वमुकारश्चापि तैजसम् । मकारश्च पुनः प्राज्ञम्' (गौ. का. १-२३) इति । तत्कथमत्र सर्वथापि ज्ञानानन्तरं कर्तव्याभावोऽभ्युपगम्यते भगवता ?

शृणु वत्स, यथैतदुपपद्यत इति । भवदुदाहृता मन्त्राः, कारिका च क्लृप्तसामान्यज्ञानपूर्वकं पादमात्रैकत्वं विज्ञातवतां विश्वादिभावज्ञानं भवतीत्याहुः । तदेतत् ओङ्कारसाधनज्ञानस्तुत्यर्थमेव, यथोक्तक्रमेण अकाराद्यभिन्नपादविज्ञानेन क्रमशः पादमात्राप्रविलयार्थम् ।

तदुक्तम् 'तत्रावान्तरफलवचनं प्रधानसाधनस्तुत्यर्थम्' (मां. भा. मं. ११, पा. १९२) इति । पादमात्राविभागविधुरोङ्काराख्यपरमात्मविज्ञाने तु न किञ्चित् गतिपूर्वकं फलं श्रूयते गौडपादाचार्यैरुक्तं वा अस्ति । 'संविशत्यात्मनात्मानम्' इति श्रुतिः, आचार्यवचनं च 'नामात्रे विद्यते गतिः'। 'स मुनिः' इति आत्मन्यवस्थानरूपमुनित्वफलमात्रं हि तत्र विज्ञायते। तथा च भाष्यकारः 'परमार्थदर्शनात् ब्रह्मवित् तृतीयं बीजभावं दग्ध्वा आत्मानं प्रविष्ट इति न पुनर्जायते, तुरीयस्याबीजत्वात्। न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पः, बुद्धिसंस्कारात् पुनः पूर्ववत् तद्विवेकिनाम् उत्थास्यति' इति परमविज्ञानफलमुक्त्वा 'मन्दमध्यमधियां तु प्रतिपन्नसाधकभावानां सन्मार्गगामिनां संन्यासिनां मात्राणां पादानां च क्लृप्तसामान्यविदां यथावदुपास्यमान ओङ्कारो ब्रह्मप्रतिपत्तये आलम्बनी भवति' (मां. भा. १२, पा. १९४) इति उपासनां विशिष्टाधिकारिणः प्रत्येवाह । यत एवम्, तस्मात् त्वं सर्वेषां वेदान्तानां ब्रह्मात्मैकत्वे एव परमतात्पर्यं बुद्ध्वा तथैव चानुभवानुसारिण्या युक्त्या अनुसन्धाय स्वात्मनिष्ठो भव । नातः परमस्ति । आत्मप्रत्ययिकं ह्येतत् तत्त्वम् । तथा हि विज्ञायते 'एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते' इति । अन्यत्रापि 'तद्यदात्मविदो विदुः' (मुं. २–२–९) इति । तत्रैव भाष्यकारश्च 'आत्मानं स्वं शब्दादिविषयबुद्धिप्रत्ययसाक्षिणं ये विवेकिनो विदुः जानन्ति, ते आत्मविदः, तद्विदुरात्मप्रत्ययानुसारिणः । यस्मात् परं ज्योतिः, तस्मात् त एव तद्विदुः, नेतरे बाह्यप्रत्ययानुसारिणः' (मुं. भा. पा. १६३) इति ॥

अनुभवानुसारियुक्त्या चानुसन्धेयं तत्त्वम् इत्युक्तं भवद्भिः । किं युक्तिरपि तर्हि प्रमाणं भवत्यत्र ? केचिद् वदन्ति श्रुतिरेव प्रमाणं ब्रह्मविषये, न तु तर्कः 'नैषा तर्केण मतिरापनेया' (का. १–२–९) इति श्रुतेरिति । किमत्र भवतां निश्चितं मतम् ?

न हि वत्स, सर्वथा श्रुतिस्तर्कमात्रं व्यावर्तयति । यतः सैवाह 'श्रोतव्यो मन्तव्यः' (बृ. २–४–५) इति । 'श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात्' (सू. भा. १–१–२, पा. ८) इति हि भाष्यम् । निराकरणं तु उत्प्रेक्षारूपस्य केवलस्य तर्कस्य । भाषितं च पूज्यपादैः 'यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनाः तर्का अप्रतिष्ठिता भवन्ति ; उत्प्रेक्षाया निरङ्कुशत्वात् ।' (सू. भा. २–१–११, पा. १९२) इति । "यदपि श्रवणव्यतिरेकेण मननं विदधत् शब्द एव 'तर्कमप्यादर्तव्यं दर्शयति' इत्युक्तम्, नानेन मिषेण शुष्कतर्कस्यात्र आत्मलाभः संभवति । श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते । स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारात् आत्मनो अनन्वागतत्वम्, संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना सम्पत्तेर्निष्प्रपञ्चसदात्मत्वम् । प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेकः– इत्येवञ्जातीयकः" (सू. भा. २–१–६, पा. १८८) इति च । दर्शितश्च मया एतादृशोऽनुभवानुसारी तर्कः, अध्यारोपापवादप्रक्रियां प्रपञ्चयता । तस्मादत्र किञ्चिद्विरुद्धमुक्तं मया विलक्ष्यसेव त्वं श्रुत्यर्थमनुभवानुसारियुक्त्या अनुसंधाय स्वात्मनिष्ठो भव । कृतकृत्यो भविष्यसि ॥

इति श्री विद्युद्वेदान्तसारे अनुभवदृष्ट्या उपदेशः

———

# अथ मनःप्रधानदृष्ट्या उपदेशः

**शिष्यः** — 'अकारो नयते विश्वम्' इत्यादिकारिकावचनं ओङ्कारज्ञानस्तुत्यर्थम् इत्युक्तं भवद्भिः । तत्र नेदं रुद्ररोदनवचनादिवत् केवलमविद्यमानार्थवादो भवितुमर्हति, प्रमाणान्तरविरोधाभावात् । न च 'आप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद' (मां. ९) इत्यादिफलसंकीर्तनं प्रमाणान्तरावगतानुवादो भवितुमर्हति । न हि अकारस्य वैश्वानरसाम्यं वा तज्ज्ञानेन सर्वकामावाप्तिः, सर्वमहत्त्वलक्षणादित्वप्राप्तिर्वा फलं लोके दृष्टम् । तदेवंविधं फलं श्रूयमाणमपि कथं केवलं ज्ञानस्तुत्यर्थमिति श्रद्दध्याम् ?

**गुरुः** — सत्यमस्ति फलसङ्कीर्तनम् । तथापि उत्तमाधिकारिणां ज्ञानफलप्राप्त्यैव सर्वस्याप्यवान्तरफलस्य प्राप्तत्वादेव तत्कीर्तनस्य स्तुत्यर्थतेति न विरुध्यते । उक्तं च **वार्तिककारैः** 'उपासनं च यत्किञ्चिद् विद्याप्रकरणे श्रुतम् । तदप्यैकात्म्यविज्ञानयोग्यत्वायैव कल्पते' (सं. वा. ३२९) इति । इदं च परमतात्पर्यदृष्ट्या उच्यते । मन्दमध्यमाधिकारिणां तु ब्रह्मप्रतिपत्तये आलम्बनमपि भवत्योङ्कार इत्यवोचम् । तथा च श्रुत्यन्तरम् 'एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥' (का. १-२-१७) इति ॥

**शिष्यः** — मन्दमध्यमाधिकारिभिः कथमोङ्कार उपासनीयः ?

**गुरुः** — एतदुक्तं प्रश्नोपनिषदि 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः । तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति ॥'

(प्र. ५–२) इति । तत्रैव भाष्यम् 'परं हि ब्रह्म शब्दाद्युपलक्षणानर्हं सर्वधर्मविशेषवर्जितम्, अतो न शक्यम् अतीन्द्रियगोचरत्वात् केवलेन मनसा अवगाहितुम् । ओङ्कारे तु विष्ण्वादिप्रतिमास्थानीये भक्त्या आवेदितब्रह्मभावे ध्यायिनां तत् प्रसीदतीत्यवगम्यते, शास्त्रप्रामाण्यात् । तथा अपरं च ब्रह्म' (प्र. भा. ५–२) इति । तदेवम् ओङ्कारं ब्रह्म-प्रतीकत्वेन ध्यात्वा एतेनैवालम्बनेन तदन्वेतीति श्रुत्यभिप्रायः ॥

**तत्रापि 'तमृचो मनुष्यलोकमुपनयन्ते', 'सोऽन्तरिक्षं यजुर्भिरुन्नीयते' इत्यवान्तरफलं श्रूयते । तत्किं परब्रह्मणः, उत तद्रूपापरस्य ब्रह्मण उपासनम् इति विशयो भवति ॥**

तत्र सर्वत्रैव परब्रह्मण एव ध्यानं भवति । परमफलं तु ब्रह्मज्ञानेन परब्रह्मप्राप्तिरेव । तथापि तु 'यदि कृत्स्नशो मात्रात्रयविभागज्ञो भवति ध्यायी तदा ब्रह्मलोकं गत्वा ततः परं ब्रह्म पश्यति ; अकारमात्रार्थाभिज्ञस्य मनुष्यजन्मप्राप्तिः फलम्, द्विमात्रार्थज्ञस्य तु ध्यायिनः सोमलोकगमनम् – इत्येवम् एकदेशज्ञानपूर्वकमपि ध्यानं विशिष्टफलकम्, किमु वक्तव्यं कृत्स्नोङ्कारार्थभूतपरब्रह्मध्यानमिति' – इत्येवं ओङ्कारध्यान-स्तुत्यर्थमपि भवति लोकप्राप्तिफलनिर्देश इत्यदोषः ॥

**अथ मन्दमध्यमाधिकारिभेदेन कथं फलभेदो भवेत् ?**

ओङ्कारस्य मात्राणां पादानां च व्यस्तसामान्यविदां यद्यप्येवमेव फलं ब्रह्मलोकप्राप्तिः, तथापि ओङ्कारं वाचकत्वेन ब्रह्म च तद्वाच्यत्वे-नाभिध्यायतः तत्पादस्य स्वरूपज्ञानं स्फुटतरमिति वाचकत्वेन ध्यातुः

शीघ्रतरमनायासेन साक्षात्कारः, प्रतीकत्वेन ध्यायतस्तु दीर्घतरकालेनायासपूर्वकमित्येवं तारतम्यं भवेत् । तदुक्तं गीताभाष्ये "यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत ........', 'ओमित्येतत्' इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत् प्रतीकरूपेण वा परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्योङ्कारस्योपासनं कालान्तरे मुक्तिफलमुक्तं यत् तदेवेहापि ........ कालान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यम् .... इत्येवमर्थम् उत्तरो ग्रन्थ आरभ्यते" (गी. भा. ८–१२, पा. १३०) इति ॥

कीदृशं पुनरभिध्यानं परब्रह्मणः ? कथं च तस्यावाङ्मनसगोचरस्य ओङ्कारवाच्यत्वं ध्यायतिकर्मत्वं च भवेत् ?

अभिध्यानमत्र साभिनिवेशं ध्यानम् । तथा हि भाष्यम् – 'आत्मप्रत्ययसन्तानाविच्छेदो भिन्नजातीयप्रत्ययान्तराखिलीकृतो निर्वातस्थदीपशिखासमः, अभिध्यानशब्दार्थः । सत्यब्रह्मचर्याहिंसाऽपरिग्रहत्यागसंन्यासशौचसन्तोषामायावित्वाद्यनेकयमनियमानुगृहीतः' (प्र. भा. ५–१, पा. १२८) इति । यद्यपि न वाङ्मनसगोचरः परमेश्वरः, तथापि ओङ्कारे प्रयुज्यमाने स प्रसीदति साधकानुग्रहार्थं प्रियनामग्रहणेनेव महान् पुरुषः, स्वनाम्नि च प्रतीकत्वेनोपास्यमाने तावतैवात्मानमुपास्यमानं मत्वा फलदानेनानुगृह्णातीति न चित्रम् । उपासनस्य च मानसकर्मत्वात् यज्ञादिवदेव कालान्तरे देशान्तरे च परिपाकेन फलदायित्वमुपपद्यते । तथा हि शास्त्रम् 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये

संपन्नः । यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरि शयं पुरुषमीक्षते ॥ ' (प्र. ५–५, पा. १३०) इति ॥

**अत्र ध्यातव्यः पुरुषः कीदृशः ? 'स तेजसि सूर्ये संपन्नः' इति वचनात्, 'स सामभिरुन्नीयते ब्रह्मलोकम्' इति च गतिपूर्वकं देशपरिच्छिन्न-फलप्राप्तिविज्ञानाच्च अपरं ब्रह्मैवात्र विवक्षितमिति भाति । उपक्रमे पिप्पलादवचनमप्यस्ति 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः। तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति' (प्र. ५–२) इति । वेदान्तिनश्च केचिदुशन्ति निर्गुणब्रह्मणो ध्यानकर्मत्वमेव नास्तीति । तत् कथमिदं परब्रह्मणो ध्यानमिति प्रत्येतव्यम् ?**

अत्र श्रुतिरेव भगवती प्रमाणं भवितुमर्हति । सा च 'एतेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र. ५-५) इत्येवाऽऽह । न चेयं साक्षान्निर्गुणस्योपासना येन कथं तस्याभिध्यानकर्मत्वम्, कथं च तदुपासनस्य कालदेशपरिच्छिन्नफलत्वम् ? – इति शङ्क्येत । ओङ्कार-लक्षणप्रतीकस्य हि अत्र ध्यानं परब्रह्मदृष्ट्या, अतो नात्र कश्चिद् विरोधः ॥

**अत्र वाक्ये परमेव ब्रह्म ध्यातव्यत्वेनोपदिश्यत इति किमस्ति गमकम् ?**

शृणु तद् वक्ष्यामि । 'परं पुरुषम् अभिध्यायीत' इति 'पर' शब्देनैव विशेषितः पुरुषः (प्र. ५–१) । 'यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः' (५–५) इति च सर्वपापविनिर्मोकः परमात्मानं गमयति ; 'य आत्मा अपहतपाप्मा' इत्यादिस्थले सर्वधर्माधर्मविनिर्मोकस्य परमात्मनि श्रुतत्वात् । तथा

'एतस्माज्जीवघनात् परात्परं पुरि शयं पुरुषम् ईक्षते' इति परमपुरुष-दर्शनं फलत्वेन श्रूयमाणं परमात्मन एवासाधारणं लिङ्गं भवति ॥

**कथं पुनर्देशविशेषं प्राप्तस्य परब्रह्मदर्शनम् ? न हि सर्वगतं ब्रह्म देशविशेष-परिच्छिन्नं भवेदिति ॥**

नायं दोषः । उपासनाबलात् सत्यलोकं गतस्य देशविशेषमहिम्ना परिपाकं गतायामुपासनायाम् अवस्थात्रयातीततुरीयब्रह्मात्मज्ञानप्राप्त्या परमपुरुषेक्षणं हिरण्यगर्भेण सह कल्पान्ते मुक्तिश्चोपपद्यते । तथा ह्युक्तं श्रुत्या 'जीवघनात् – हिरण्यगर्भात् परं पुरुषमीक्षते' – इति । यद्यपि प्रतीकालम्बनानां ब्रह्मलोकप्राप्तिर्न भवतीति सामान्यनियमः ; 'अप्रतीकालम्बनान् नयतीति बादरायणः'(वे.सू. ४–३–१५) इति न्यायात्, तथापि अत्र वचनात् ब्रह्मक्रतुत्वाच्चोङ्कारोपासकस्य ब्रह्मलोकप्राप्तिर्भवत्येव 'तं यथा यथोपासते तत्तदेव भवति' (श. ब्रा. १०–५–२–२०) इति श्रुतेः । तदुक्तम् 'त्रिमात्रेणोङ्कारेणालम्बनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः, क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद् भविष्यतीत्यदोषः' (सू. भा. १–३–१३, पा. १०५) इति । अवस्थात्रयपुरुषाणां मात्रात्रयरूपोङ्कारात्मना दृष्टत्वात् तदीदृशं फलं सेत्स्यतीति मन्त्रद्वयेन प्रकाशितं वाक्यशेषेऽपि 'तिस्रो मात्रा मृत्युमत्यः प्रयुक्ताः अन्योन्यसक्ता अनविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥ ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत् कवयो वेदयन्ते । तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति ॥' (प्र. ५–६, ७) इति ; ब्रह्मलोकं

गतानाम् उपासनावीर्येण सम्यग्दर्शनं प्राप्तानां क्रममुक्तिर्भवित्रीति बादरायणीयं सूत्रं भवति 'कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्' (वे. सू. ४-३-१०) इति । अतः सर्वमनवद्यम् ॥

## निदिध्यासनेनात्रैव ब्रह्मात्मावगतिः

२७. यद्युपासनाबलात् सम्यग्दर्शनप्राप्तिः सत्यलोके, तर्हि उपासनावीर्यातिशयेन इहापि लोके केषाञ्चित् सम्यग्दर्शनं स्यात् । किं सोऽस्त्युपासनाविशेषः, यद्बलात् सम्यग्ज्ञानमिहैव प्राप्येत ?

बाढम्, अस्त्येव । तथा हि श्रुतिः 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. ४-५-६) इति दर्शनोपायत्वेन श्रवणमननयोरिव निदिध्यासनलक्षणमप्युपासनम् उपदिशति । तत्र भाष्यकारश्चाह 'दर्शनपर्यवसायीनि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति । यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि तद्वत्' (सू. भा. ४-१-१, पा. ४६०) इति ॥

ननु भगवन्, उपासनं नाम भावनारूपश्चित्तवृत्तिप्रवाहः । तेन अवघातादिवत् दृष्टफलप्राप्तिः कथं भवेत् ? न हि मनोरथकल्पितेन मोदकेन वास्तविकी क्षुन्निवृत्तिः स्यात् ॥

न । विशेषात् । विशेषो हि भवति पुरुषप्रयत्नसाध्यभावनालक्षणाया एकाग्रतायाः, वस्तुतत्त्वनिरीक्षणप्रयत्नविशेषरूपप्रणिधानलक्षणस्य निदिध्यासनस्य च । श्रुतिश्च यथैव दृष्टादृष्टफलप्राप्तये उच्चावचान्युपासनानि विधत्ते, तदनुष्ठानाच्च केनाप्यदृष्टेन प्रकारेण फलप्राप्तिर्भवति शास्त्रदृष्ट्या, तथैव आत्मदर्शनायापि निदिध्यासनम् अध्यात्मयोगापराभिख्यम्

उपायम् उपदिशति । स चोपायः रत्नपरीक्षकादीनामिव कालेन महता अभ्यासेन दृष्टमेव फलं सूते । तथा हि श्रुतिः – 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥' (का. १–२–५२) इति, 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥' (का. १–३–१२) इति परमात्मनो दुर्दर्शतां योगविशेषसंस्कृताग्र्यबुद्धिगम्यतां च दर्शयति । एवं च नेदमितरोपासनवत् केवलं भावनारूपम्, किं तर्हि प्रणिधानरूपमित्यस्ति विशेषः । अत एव दृष्टफलानाम् उपासनानां यावत् सम्यग्दर्शनोत्पत्तिः तावदेव कर्तव्यता इत्याह भगवान् भाष्यकारः – "यानि तावत् सम्यग्दर्शनार्थान्युपासनानि, तानि अवघातादिवत् कार्यपर्यवसानानि इति ज्ञातमेवैषाम् आवृत्तिपरिमाणम् । न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किञ्चित् शासितुं शक्यम् । अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात् " (सू. भा. ४–१–१२, पा. ४७१) इति ॥

**कथं तर्ह्ययम् अध्यात्मयोगः कर्तव्यः ? किमस्त्यस्य योगस्य पातञ्जलादिदर्शनोपदिष्टाद् योगाद् किमपि वैलक्षण्यम् ?**

ओम् । अस्ति श्रौतस्यास्य योगस्य पातञ्जलादेर्विशेषः । यस्मात् वेदान्तोक्ताद्वितीयब्रह्मात्मदर्शनार्थं श्रुतिदर्शितोऽयं योगः ; पातञ्जलस्तु चित्तवृत्तिनिरोधेनात्मचित्तान्यतादर्शनादिफलकः । अत एव सूत्रम् 'एतेन योगः प्रत्युक्तः' (वे. सू. २–१–३) इति । भाष्यं च "यत्तु दर्शनमुक्तम् 'तत्कारणं साङ्ख्ययोगाभिपन्नम्' (श्वे. ६–१३)

इति, वैदिकमेव तत्र ज्ञानं ध्यानं च साङ्ख्ययोगशब्दाभ्याम् अभिलप्यते प्रत्यासत्तेरित्यवगन्तव्यम् ” (सू. भा. २–१–३, पा. १८३) इति ॥

**कथं तर्हि तस्यास्य योगस्यानुष्ठानम् ? तद्भगवन्तो विशदीकर्तुमर्हन्ति ॥**

तदेतत् श्रुत्यैव विवृतमस्ति ‘ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ’ (का. १–३–१३) इति । व्याख्यातं चेदं सूत्रभाष्ये ‘ एतदुक्तं भवति । वाचं मनसि संयच्छेत् वागादिबाह्येन्द्रियव्यापारम् उत्सृज्य मनोमात्रेणावतिष्ठेत । मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धौ अध्यवसायस्वभावायां धारयेत् । तामपि बुद्धिं महत्यात्मनि, भोक्तरि अग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत् । महान्तं तु आत्मानं शान्ते आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेत् इति ” (सू. भा. १–४१, पा. १४७) इति । तदेवं इन्द्रियमनोबुद्धिमहताम् उत्तरस्मिन्नुत्तरस्मिन् पूर्वं पूर्वं प्रविलाप्य महान्तमप्यात्मानं शान्ते शिवेऽद्वैते आत्मनि प्रविलाप्य साधकस्तुरीयमेवात्मानं प्रतिपद्येत इत्यभिप्रायः । इदं हि प्रविलापनं स्थूलस्य व्याप्यस्य बाह्यस्य इन्द्रियादेः सूक्ष्मतरत्वमहत्तरत्वप्रत्यक्तरत्वपारम्पर्यदर्शनेन परमपुरुषे सर्वप्रत्यगात्मनि निष्ठां प्रापयति । यथा हि तन्तुसंस्थानरूपस्य पटस्य तन्त्वव्यतिरिक्तत्वम्, तन्तूनामंश्वव्यतिरेकेणाभावम्, अंशूनां च तदवयवाव्यतिरिक्तत्वं ददृशिवान् तत्तत्कारणे बुद्धेर्निष्ठां लभते तद्वदिहापि निदिध्यासमानः परमसूक्ष्मे सर्वप्रत्यगात्मनीति बोद्धव्यम् ॥

**तत्किमिह सर्वथापि पातञ्जलयोगस्यानादरणमेव क्रियते ?**

न । 'परमतमप्रतिषिद्धम् अनुमतं भवति' इति न्यायात् स्वसिद्धान्तानुकूलं साङ्ख्ययोगाद्युपदिष्टमपि साधनम् अनुमन्यत एव । यदाह सूत्रभाष्यकृत् 'येन त्वंशेन न विरुध्येते, तेनेष्टमेव साङ्ख्ययोगस्मृत्योः सावकाशत्वम्' (सू. भा. २-१-३, पा. १८३) इति । दृश्यत एव च श्वेताश्वतरोपनिषदि आसनादिकल्पनापुरःसरं बहुप्रपञ्चं योगविधानम् । गीतास्वपि 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' (गी. ६-११), 'स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः । प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ' (गी. भा. ५-२७) इत्यादिना ध्यानयोगाङ्गत्वेन आसनाद्युपदिश्यते । तेन यमनियमासनप्राणायामप्रत्याहारादीनि योगाङ्गानि तत्रोपदिष्टान्यप्यवश्यम् उपादेयानि । अत्र ध्यानधारणासमाधयस्तु वेदान्तोपदिष्टाद्वितीयात्मविषयाण्येव भवन्ति । 'आत्मन्येव मनः कृत्वा न किञ्चिदपि चिन्तयेत्' (गी. ६-१५), 'प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥' (गी. ६-२७) इत्यादिवचनात् । फलं चात्र न पातञ्जलोक्तप्रकृतिपुरुषान्यताख्यातिः ; किं तर्हि ब्रह्मात्मैकत्वदर्शनमेव 'सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः' (गी. ६-२९) इत्युक्तेः ॥

अत्रैकः प्रश्नः क्रियते मया । केचित्तु आचार्याः मनोनिग्रहमेव मुक्तिसाधनमिति वदन्ति, अपरे तु आसनाद्यप्यावश्यकं पुरुषार्थप्राप्तौ मन्यन्ते । तत्किमु इमावप्यपेक्षितव्यौ, उताहो निदिध्यासनमेवालं ब्रह्मात्मतावाप्तये इति कृपया वक्तुमर्हथ ॥

संज्ञाभेद एवायं न साधनप्रकारभेदः । यस्मात्, यदा निदिध्यासितुर्मनो ब्रह्मणि लीयते, तदा स्वात्मनो ब्रह्माऽव्यतिरिक्ततामेव पश्यति योगी । तत्र कुतो वार्ता निग्राह्यस्य मनसः, तत्स्थवासनानां वा अवशेषस्य ? अत एव हि गीतासु ध्यानयोगप्रसङ्गेन भगवन्तं कृष्णं प्रति अर्जुनस्य प्रश्नः ' चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ' (गी. ६–३४) इति । भगवत उत्तरं च ' असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ' (गी. ६–३५) इति । ध्यानयोगाभ्यासेनैव वैराग्ययुक्तेन मनोनिग्रहः साध्यत इत्यभिप्रायः ॥

अत एव **संप्रदायविदो गौडपादाचार्या** अपि ' आत्मसत्यानुबोधेन न संकल्पयते यदा । अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥ ' (गौ. का. ३–३२), ' निगृहीतस्य मनसो निर्विकल्पस्य धीमतः । प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥ ' (गौ. का. ३–३४) इति तत्त्वविवेकेन आत्मैव सत्यम् इति निश्चितवतो ज्ञानिनो मनोनिग्रहोऽनायासेन भवति, तदानीमात्मव्यतिरिक्तस्य मनसोऽभावात्– इत्युक्त्वा मध्यमाधिकारिणो निदिध्यासनेनैव मनोनिग्रहापराभिधानेन सर्वपुरुषार्थप्राप्तिं जगुः ' मनसो निग्रहायत्तमभयं सर्वयोगिनाम् । दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥ ' (गौ. का. ३–४०) इति । **भाष्यकारा** अप्येतां कारिकाम् एवं व्याख्यन् ' येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मनः, इन्द्रियादि च, न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणाम् अभयं मोक्षाख्या अक्षया शान्तिः

स्वभावत एव सिद्धा, नान्यायत्ता 'नोपचारः कश्चन'– इत्यभेदात् ; ये तु अतोऽन्ये योगिनो मार्गगाः, हीनमध्यमदृष्टयः, मनोऽन्यदात्मव्यतिरिक्तम् आत्मसंबन्धि पश्यन्ति, तेषाम् आत्मसत्यानुबोधरहितानां 'मनसो निग्रहायत्तमभयं सर्वेषां योगिनाम्' (गौ. का. भा. ३–४०, पा. २२५) इति । अतः ज्ञानेन मन आदीनामध्यस्तत्वनिर्धारणे, योगेनात्मनि तद्विलापने वा आत्मैवावशिष्यते । न कस्यचित् निग्रहो वा लानवं वा कर्तव्यमवशिष्यते – इति निश्चितु । किञ्चान्यत्, मनोनिग्रहोऽप्ययं निदिध्यासनापरपर्यायः, ज्ञानार्थ एवेति 'दृश्यते त्वग्र्यया बुद्ध्या' (का. १–३–१२), 'ईक्षते योगयुक्तात्मा' (गी. ६–२९) इति श्रुतिस्मृतिभ्यां निश्चीयते ॥

अभ्यासेन च वैराग्येण च मनो निगृह्यते इत्युक्तम् । तत्र कीदृशोऽभ्यासः कीदृशं वा वैराग्यम् ?

अत्र प्रयत्नेन साधयिष्याम्येव मनोनिग्रहम् इति व्यवसायवान् मनश्चञ्चलमिदं प्रयत्नेनापि नैतावत्पर्यन्तम् ईषदपि मन्दीभूतम् – इति निर्वेदमनाप्नुवन् प्रयतेत । तदुक्तं भगवता 'स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा' (गी. ६–२३) इति । एवं निश्चयवान् अनिर्विण्णश्च सन् 'यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्' (गी. ६–२३) इति भगवदुक्तिमनुसरन् अभ्यासं कुर्यात् । तत्राभियुक्तैरुपायो निर्दिष्टः 'दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् । अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति' (गौ.का. ३– ४३) इति । एवमभ्यस्यतः लयविक्षेपकषायरसास्वादाख्या-

श्चत्वारो विघ्नाः संभवन्ति । तत्र लयो निद्रा, यत्र साधकस्य मनोऽनायस्तं प्रसन्नं भवति । ततश्चात्मदर्शनप्रयत्नवैमुख्यम् । विक्षेपस्तु कामभोगवासनया बहिर्विषयचिन्तनम् । लयविक्षेपराहित्येऽपि विषयवासनाबीजावस्था सकषायता । सुखास्वादस्तु विघ्नत्रयपरिहाण्यैव कृतकृत्योऽहम् इति तुष्टिः । त एते विघ्नाः परिहरणीयाः । तत्रोपायं दिशन्त्यभियुक्ताः 'लये संबोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः । सकषायं विजानीयात् समप्राप्तं न चालयेत्' (गौ. का. ३–४४) इति । आत्मविवेकदर्शनेन लयात् संबोधनम्, पुनः पुनर्विषयेभ्यो व्यावर्तनत्वम्, सकषायस्थितेरपि चित्तं प्रच्याव्यात्मसाम्यापादने प्रयतनम्, विघ्नपरिहारेण या तुष्टिः, तत्रापि 'नात्मानन्द एषः, किं त्वविद्याकल्पित एव' इति विभावनं च – इत्येते उपाया विघ्नपरिहारे – इत्यभिप्रायः । एवं सर्वविघ्नपरिहारपूर्वकं प्रयतमानस्य यदा परमात्मन्येव प्रशाम्यति मनः, तदा आत्मसत्यानुबोधेन आत्मानन्दे एव प्रतिष्ठितो भवति योगी । तदुक्तं भगवता 'प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥' (गी. ६–२७) इति । श्रीगौडपादाचार्याश्चाहुः – 'यदा न लीयते चित्तं न च विक्षिप्यते पुनः । अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥' (गौ. का. ३–४६) इति ॥

**'निष्पन्नं ब्रह्म तत्तदा' इत्युक्तेः स्थितिविशेष एवैष चित्तस्येति भाति । एवं चेत् दर्शनान्तरोपदिष्टयोगात् को वाऽत्र विशेषः स्यात् ?**

तदिदं पूर्वमेवोदितं मया । तत्र हि दर्शने चित्तस्य पुरुषाद् विवेक एवाभिलषितः, इह पुनरद्वितीयब्रह्मस्वरूपेणैवावस्थानम् इति ।

किञ्च तत्र 'देशबन्धश्चित्तस्य धारणा', 'तत्र प्रत्ययैकतानता ध्यानम्', 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' (यो. सू. ३–१, २, ३) इतिवर्णितप्रकारेण देशविशेषेषु चित्तस्य बन्धं कृत्वा तत्रैव प्रत्ययस्य निरन्तरप्रवाहे साधिते, ध्येयस्वभावावेशात् तदाकारनिर्भासं सद् ध्यानं यदा स्वरूपशून्यमिव भवति तदा समाधिरिति व्यपदिश्यते। तदेतत्त्रयं संयमशब्दशब्दितं बहिरङ्गं निर्बीजस्यासंप्रज्ञातसमाधेः – इत्यभ्युपगम्यते। इह पुनः शास्त्राचार्योपदेशमनुसृत्य वस्तुतत्त्वनिरूपणेन सर्वमजं ब्रह्मेति निर्धारणे प्रयत्न एव तूपायः कथ्यते मनोनिग्रहे। निगृहीते तु मनसि, आत्ममात्रतया आत्मनाऽऽत्मानमनुभवति योगी, स एव च समाधिर्नाम – इति सुमहद्वैषम्यम्। अत्रापि यद् वदन्ति केचिद् व्याख्यानप्रस्थानीयाः 'श्रोतव्यो मन्तव्यः' इति ब्रह्मणि चित्तनिवेशात्मकधारणोपदेशः, 'निदिध्यासितव्यः' इति ध्यानोपदेशः, 'द्रष्टव्यः' इति च साक्षात्कारवृत्तेर्ब्रह्मण्यावेशात् स्वरूपशून्यकल्पत्वात् समाध्युपदेशः – इति। तत् सुतराम् अनादेयम्; आत्मनः संयमाविषयत्वात्, मनोनिग्रहस्य निदिध्यासनापराभिधानस्य सूक्ष्मवस्तुनिरूपणमात्रस्वरूपत्वात् भावनात्मकध्यानरूपत्वानुपपत्तेः, 'यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३–४–१) इति श्रुत्युपदिष्टस्य ब्रह्मात्मनः वृत्तिविषयत्वाभावात् साक्षात्काररूपवृत्त्यनपेक्षणाच्च। तस्मात्, य एवात्मसत्यानुबोधो विचारप्रधानानाम् अनुभवानुसार्यन्वयव्यतिरेकलक्षणतर्कानुगृहीतविवेकदर्शनेन श्रुतिप्रामाण्यात् सिध्यति मनसोऽमनीभावे – रज्जुतत्त्वानुबोध इव तत्र भ्रान्तिसिद्धसर्पस्यासर्पत्वनिश्चये –

स एवायं ब्रह्मात्मरूपेणावस्थितिरिति वर्ण्यते 'निष्पन्नं ब्रह्म तत्तदा' इति। न हि बुद्ध्यादि ब्रह्मरूपेण स्थितमेव सत् प्रयत्नेन पुनरपि ब्रह्मरूपेण निष्पाद्यम् इति समञ्जसं स्यादिति। न च ब्रह्मरूपेणैव परमार्थतः स्थितं बुद्ध्यादेर्ब्रह्मस्वरूपं यत्ननिष्पाद्यमिति युज्यत इति॥

तस्मात्, वेदान्तोपदिष्टमार्गेण आत्मानात्मसतत्त्वविवेकपूर्वकम् अविद्यानिरसनेन नित्यशुद्धबुद्धमुक्तस्वभावं सर्वस्याऽऽत्मभूतं 'ब्रह्मैवाहम्' इति साक्षादेवाध्यवसातुं शक्यते जिज्ञासुभिः; तदशक्तैस्तु, तदुपाय-भूताध्यात्मयोगानुष्ठानेनापि तदेव ब्रह्म स्वात्मत्वेन क्रमेण निश्चेतुं शक्यमिति सर्वं शिवम्॥

इति श्री विशुद्धवेदान्तसारे मनःप्रधानदृष्ट्या उपदेशः

# अथेन्द्रियप्रधानदृष्ट्या उपदेशः

## २८. कर्मणां ब्रह्मात्मविद्याजनने उपायत्वम्

**शिष्यः** – अथ भगवन्, ये विवेकाभ्यासेन साक्षाद् ब्रह्मात्मकत्वमवगन्तु-मनीशाः, ये च निदिध्यासनेनापि सूक्ष्मतापारम्पर्यदर्शनेनेन्द्रियादीनि ब्रह्मणि प्रविलाप्य ब्रह्मात्मतां प्राप्तुमसमर्थाः, तेषां प्रत्यक्प्रवणता-रहितानां मुमुक्षूणां का गतिः ?

**गुरुः** – तेषामपि उपायान्तरेण स्वात्मदर्शनं सिध्यत्येव कालान्तरे । उक्तं हि भगवता 'ध्यानेनात्मनि पश्यन्ति केचिदात्मान-मात्मना । अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥' (गी. १३-२४) इति । न केवलमेत एवोपायविकल्पाः, यत आह स एव भगवान् 'अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥' (गी. १३–२५) इति । न हि भगवन्त-माश्रिताः केऽपि भगवता उपेक्ष्यन्त – इति शक्यं कल्पयितुमिति ॥

**शिष्यः** – कर्मयोगः कीदृशः ? तेन कथं वा पुरुषार्थसिद्धिः ?

**गुरुः** – निःसङ्गतया द्वन्द्वप्रहाणपूर्वकम् ईश्वराराधनार्थं कर्मानु-ष्ठानं कर्मयोगः । तत्र च योगिनः ईश्वरप्रसादात् चित्तशुद्ध्यादि-क्रमेण सिद्धिर्भवति । तदुक्तम् भगवता 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥' (गी. २–४०) इति, 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।

निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥' (गी. ३–२०) इति च । श्रुतिरपि मदुक्त्येव विविदिषासिद्ध्यर्थं यज्ञादीनां विधात्री 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४–४–२२) इति; भाष्यकारश्चाऽऽह 'सर्वापेक्षा च यज्ञादि-श्रुतेरश्ववत्' (वे. सू. ३–४–२६) इति सूत्रार्थं व्याख्यत् "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि' इत्येवमाद्या च श्रुतिराश्रम-कर्मणां विद्यासाधनभावं सूचयति" (सू. भा. पा. ४४५) इति । समनन्तरोत्तरसूत्रभाष्ये च 'तस्मात्, यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्येवाश्रमकर्माणि विद्योत्पत्तौ अपेक्षितव्यानि' (सू. भा. ३–४–२७, पा. ४४६) इति ॥

**किं यज्ञादीनि शमादीनि च समुच्चित्यैव अनुष्ठीयेरन्, विकल्पेन वा ?**

गृहस्थाः समुच्चित्यापि कुर्युः । इतराश्रमिणां तु ब्रह्मचर्यं तपः सत्यवदनं शमो दमोऽहिंसा – इत्येवमादीनाम् असंकीर्णानां ध्यान-धारणादिलक्षणानां च केवलानामेव साधकतमत्वं विद्यां प्रतीति विशेषः । अत एवाह भगवान् ध्यानयोगप्रतिपादनप्रसङ्गेन 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते' (गी. ६–३) इति ॥

**किम् आश्रमकर्माण्येव विद्यार्थमनुष्ठीयन्ते अथवा मुमुक्षूणां विशिष्टान्येव कर्माणि विधीयन्ते ?**

न विशिष्टानि कर्माणि सन्ति मुमुक्षूणाम् । 'सर्वथापि त

एवोभयलिङ्गात्' (वे. सू. ३-४-३४) इति बादरायणीयसूत्रात् आश्रमिणां कर्माण्येव मुमुक्षुभिरपि अनुष्ठेयानि। इयांस्तु विशेषः – 'यावज्जीवमग्निहोत्रं जुहोति' (?), 'यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्' (गी. १८-६) इत्यादिश्रुतिस्मृतिप्रामाण्यात् आश्रमिणः कर्म कुर्वन्ति। अन्यथा विहितत्यागेन प्रत्यवायापातात्। मुमुक्षवस्तु 'यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥' (गी. १८-५), 'एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥' (गी. १८-६) इति भगवदुक्त्यनुसारेण सङ्गं फलाभिसन्धिं च त्यक्त्वा कर्म कुर्युः। पावनानां तेषामनुष्ठानात् चित्तं शुध्यति॥

तान्येव कर्माणि आश्रमिणाम् अन्यत् फलं ददति, मुमुक्षूणां त्वन्यत् फलं – इति कथमेतत् सङ्गच्छते ?

तदेतत् कर्तुरन्तःकरणभूमिकामवलम्ब्य भवति। तत्तदाश्रमे स्थितो हि 'प्रमाणभूतेन वेदेन मम चोदितं कर्म कर्तव्यम्' – इति कर्मणि प्रवर्तते ; मुमुक्षुस्तु सर्वं कर्म ईश्वरे समर्प्य तदर्थं कर्म करोमीति भृत्य इव स्वाम्यर्थं कर्म करोति। ततस्तस्य कर्मफलं न भवति। केवलं चित्तशुद्धिमात्रमेव फलं भवति। 'ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' (गी. ५-१०) इति स्मरणात्। ज्ञानी पुनर्बाह्यजनदृष्ट्या यत्र कुत्राश्रमे वसन्नपि सर्वं ब्रह्मैवेति विद्वान् स्वाश्रमकर्म करोति ; तेन तस्य सर्वं क्रिया-कारकफलजातं ब्रह्मैव संपद्यते। 'ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा

हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ ’ (गी. ४–२४) इति भगवदुक्तेः । यस्तु ब्रह्मज्ञानी संन्यस्तसर्वकर्मा, तस्य यद्यपि कर्मैव नास्ति सम्यग्दर्शनमात्रनिष्ठत्वात् तस्य ; तथापि तस्य ‘ब्रह्मैवेदं सर्वम्’ इति विजानतः ‘यदर्पणादिबुद्ध्या अधियज्ञे प्रसिद्धं तदस्य अध्यात्मं ब्रह्मैव’ इति सम्यग्दर्शनस्तुत्यर्थोऽपि भवति यथोदाहृतश्लोक इत्यन्यदेतत् ॥

## कर्मयोगेन परम्परया मुक्तिप्राप्तिक्रमः

**२९. दुर्बलानां जीवानां कर्मणि सङ्गं फलाभिसंधिं च सहसा परित्यक्तुं कथं शक्यम् ? मुमुक्षुभिरनुष्ठीयमानः कर्मयोगः कया परम्परया परमपुरुषार्थोपायत्वं प्रतिपद्यत इत्येतद् विज्ञातुमिच्छा मम ॥**

एतदपि भगवतैवाविष्कृतं गीतासु –

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ गी. १८–४५, ४६

इति । यद्यपि स्वप्रयत्नेनैव मानवमात्रेण कर्मसङ्गं फलाभिसन्धिं च त्यक्तुं न शक्यम्, तथापि ‘सर्वस्यैव जगतः सृष्टिस्थितिकर्तुः सर्वगतस्य आराधनार्थमिदं मया क्रियते स्वकर्माचरणम्, स एव मां कर्मसङ्ग-फलाभिसन्धिबन्धात् प्रमोचयिष्यति’ इत्येवं श्रद्धावतः भगवानेव कर्मयोगसाद्गुण्यं संपादयिष्यति । तेनैवास्य योगिनः सत्त्वशुद्धिद्वारा ज्ञाननिष्ठायोग्यतालक्षणा सिद्धिरपि भविष्यति ॥

एतां सिद्धिं प्राप्तस्य, क्रमेणोत्पन्नात्मानात्मविवेकज्ञानस्य केवलात्म-

ज्ञाननिष्ठारूपा नैष्कर्म्यसिद्धिरपि भवित्री । तत्प्राप्तिक्रमोऽपि भगवतैव प्रदर्शितः –

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

गी. १८–५०तमश्लोकमारभ्य ५५तमश्लोकपर्यन्तम्

इति । अत्र कर्मयोगसिद्धिं प्राप्तस्य ध्यानयोगः, ज्ञानप्राप्तिः, ज्ञाननिष्ठाख्या परा भक्तिश्च – इत्येते क्रमेण सिध्यन्ति, येन परब्रह्मण्येव प्रवेशः परमपुरुषार्थो लभ्यत इत्युक्तम् ॥

## वर्णाश्रमकर्मरहितानां गतिः

३०. ये वर्णाश्रमाचारादपि परिभ्रष्टाः, किं तेषां सर्वथा अधोगतिरेव फलम्, आहोस्वित् श्रद्धावतां तेषामप्यस्ति भगवत्प्राप्तौ उपायः कश्चित् ?

आसुरसंपदः अहङ्कारबलदर्पकामक्रोधादिलक्षणाया वियुक्ताश्चेत्

तेषामपि परमेश्वरशरणतयैव पुरुषार्थः क्रमात् सिध्यत्येव । यथाऽऽह भगवान् दयाघनः –

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ गी. १८–५६

इति । अत्र सर्वकर्माण्यपि इत्यत्र 'प्रतिषिद्धान्यपि' इति भाष्यकारव्याख्यानमवधेयम् । अन्यत्र च स्वयं भगवानेवाह –

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥
गी. ९–२९तमश्लोकमारभ्य ३३तमश्लोकपर्यन्तम्

इति ॥

**येषां यज्ञदानतपोरूपं कर्म नास्ति, तैः कथं भगवानभ्यर्चनीयः ?**

अनाश्रमिणामपि विद्याधिकारोऽस्त्येव । तदुक्तं भगवत्पादैः – 'अनाश्रमित्वेन वर्तमानोऽपि विद्यायामधिक्रियते । कुतः ? तद्दृष्टेः ; रैक्ववाचक्नवीप्रभृतीनामेवंभूतानामपि ब्रह्मवित्त्वश्रुतेः ' (सू. भा. ३–४–३६) इति ; 'तेषामपि विधुरादीनाम् अविरुद्धैः पुरुषमात्रसंबन्धिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः संभवति'

(सू. भा. ३-४-३८) इति च । येषामपि स्ववर्णोचितकर्मापि नास्ति, तेषामपि सुखाराधनो भगवान्, यत आह –

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ गी. ९-२६.

इति । सर्वं हि लोके वस्तु भगवत एव वस्तुतः । अतो निर्ममत्वबुद्ध्या यत् पत्रपुष्पादिकमपि भक्त्या 'भगवदर्पितमस्तु' इति कल्पयति, तेनैव भगवत्प्रसादार्हो भवति । तथा होमदानतपोभिरिव भगवदर्पितैर्लौकिकैरपि कर्मभिः परितुष्टो भगवान् प्रसीदत्येव –

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ गी. ९-२७

इति वेदोक्तकर्मभिः साकमेव कर्मसामान्यस्यापि समभिव्याहारात् ॥

अपि च पुराणस्मृतिरप्यस्ति –

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥ वि. पु. ६-२-१७

इति । तस्मात्, कलियुगमहिम्ना दुःसङ्गवशात्, संनिवेशविशेषप्रभावाद्वा ये शास्त्रोक्तकर्मबाह्या भवन्ति, तेषामपि भगवन्नामस्मरणादिना चित्तशुद्धिः स्वस्वलौकिककर्मानुष्ठानमात्रेणापि भगवदभ्यर्चनं परम्परया परमपुरुषार्थसाधनायैव भवतीति निश्चेतव्यम् । भगवद्भक्तेरवश्यंभाविमोक्षफलत्वमिति च श्रद्धेयम् –

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ गी. ९-३४.
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
गी. १८-६४, ६५

इति च सावधारणप्रतिज्ञादर्शनात् भगवतः ॥

तस्मात्, मुमुक्षुभिर्यथाधिकारं तत्तत्साधनैर्भगवच्छरणताम्, भक्तिद्वारेण यथोक्तक्रमेणात्मज्ञाननिष्ठां च संपाद्य कृतकृत्यैर्भवितव्यम् । भक्तिर्हि भगवत्तत्त्वविज्ञाने भगवद्भावप्राप्तौ च द्वारमैकान्तिकमिति भगवतैवोक्तम् – 'मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते' (गी. १३-१८) इति । व्याख्यातं चैतद् भाष्यकारैः – 'अस्मिन् सम्यग्दर्शने कोऽधिक्रियत इति? उच्यते – मद्भक्तः मयि ईश्वरे परमगुरौ वासुदेवे, समर्पितसर्वात्मभावः, यत् पश्यति शृणोति स्पृशति वा सर्वमेव भगवान् वासुदेव इत्येवंग्रहाविष्टबुद्धिः, मद्भक्तः; स एतद् यथोक्तं सम्यग्दर्शनं विज्ञाय, मद्भावाय–मम भावो मद्भावः, परमात्मभावः; तस्मै मद्भावाय–उपपद्यते, मोक्षं गच्छति इत्यर्थः' (गी.भा. १३-१८, पा. २०६) इति ॥

इति श्री विशुद्धवेदान्तसारे इन्द्रियप्रधानदृष्ट्या उपदेशः

# अथ कृतकृत्यलक्षणम्

## जीवन्मुक्तिः

**३१. शिष्यः – ज्ञाननिष्ठया कृतकृत्यानां किं लक्षणम् ? कथं लोके ज्ञाननिष्ठो महात्मा अभिज्ञातव्यो भवति मुमुक्षुभिः ?**

गुरुः – अविद्यया कार्यकरणसङ्घातमहमेवेति तादात्म्येनानुभवन् बद्ध इत्युच्यते । यस्तु विद्यया तामविद्यामत्यन्ताय विनाश्य स्वात्मन्येव अजरे अमरेऽमृतेऽभये अवतिष्ठते, स महात्मा शरीरेन्द्रियादिवर्जितोऽविद्याकामकर्मभिर्मुक्तत्वात् 'जीवन्मुक्त' इति परिभाष्यते वेदान्तेषु । तथा हि श्रुतिः – 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः । अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥' (का. २-३-१४, १५) इति ॥

**जीवत एव मानवस्य कथं शरीरादिराहित्यं स्यात् ? जीवनं हि नाम शरीरे स्थित्वा करणव्यापारयितृत्वम् ॥**

सत्यम्, व्यवहारदृष्ट्या शरीरेन्द्रियसङ्घातेन व्यापारवत्त्वमेव जीवनम् । सा तु दृष्टिरविद्याकृता इति प्रदर्शितं प्राक् । पारमार्थिकदृष्ट्या तु शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं न विद्यत एव । न ह्यसङ्गस्यात्मनस्तत्साक्ष्यभूतेन शरीरेण कश्चित् संबन्धः कयाचिद् युक्त्या दर्शयितुं शक्यते । न चानुभवदृष्ट्या समस्ति

शरीरादिकम्, सर्वस्य हि परमार्थसद्रूपानुभवेनैव व्याप्तत्वात् नानुभवातिरेकेणाऽस्ति किञ्चिदपीति । प्रतिभासस्तु व्यावहारिकः शरीरादिसङ्घातस्य स्वाप्नशरीरादिप्रतिभासवदन्यथाप्युपपद्यते । शरीरे 'अहम्' इति प्रत्ययस्तु नैसर्गिकाविद्याफलमित्यवोचम् । न चायं गौणः प्रत्ययः 'अयमात्मा, इदं शरीरम्' इति विविक्तप्रत्ययादर्शनात् । तदुक्तं **सूत्रभाष्यकारेण** "यथा मन्दान्धकारे स्थाणुरयम् इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ, स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्मात् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ, तद्वद् देहादिसङ्घाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेन उत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् ? आत्मानात्मविवेकिनामपि पण्डितानाम् अजाविपालानामिव अविविक्तौ शब्दप्रत्ययौ भवतः । तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथा च ब्रह्मविद्विषया श्रुतिः 'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४–४–७) इति ।" (सू. भा. १–१–४, पा. २२, २३) इति ॥

अत एव करणादिव्यापारयितृत्वमपि मिथ्यैव ज्ञानिदृष्ट्या । यथोक्तं **भगवता** 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्वन् स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् । प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥' (गी. ५–८, ९) इति । 'सर्वकर्माणि मनसा

संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देही नैव कुर्वन् न कारयन् ॥' (गी. ५-१३) इति च। यद्यप्येवं गीतासु इन्द्रियाणाम् इन्द्रियार्थानां च विषयविषयिभावलक्षणः संबन्ध उच्यते साङ्ख्यप्रक्रियानुसारेण, तथापि प्रकृतेरपि मायाऽपरसंज्ञाया अविद्याकल्पितत्वात्, मायापरिणामत्वाच्च शरीरेन्द्रियादेः, अशरीरत्वमेव स्वाभाविकम्। यदप्युक्तं भगवता 'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥' (गी. ५-१४) इति। व्याख्यातं च भाष्यकारेण "कस्तर्हि कुर्वन् कारयंश्च प्रवर्तत इति? उच्यते-'स्वभावस्तु प्रवर्तते'। स्वो भावः स्वभावः, अविद्यालक्षणा प्रकृतिः, माया प्रवर्तते" (गी.भा. ५-१४) इति ॥

**यद्यप्येवं ज्ञानी स्वयं मन्येत 'नाहं शरीरादिसङ्घातवान्, नापि कर्ता भोक्ता वा' इति, तथापि कथं परैरसौ विज्ञायते 'जीवन्मुक्तोऽयम्' इति?**

एतस्य लक्षणम् 'स्थितप्रज्ञत्वम्', 'युक्तत्वम्', 'भक्तत्वम्', 'त्रिगुणातीतत्वम्', इति च भगवद्गीतासु द्वितीयषष्ठद्वादशचतुर्दशेषु अध्यायेषु वर्णितम्। सङ्क्षेपेण तु तस्य लक्षणं समुदाहरिष्यमाणैः श्लोकैरुन्नेतुं शक्यते। अधिकं तु समग्रगीताशास्त्रार्थविचारणादध्यवसेयम् ॥

(१) प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवाऽऽत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ २-५५

(२) विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ २-७१

(३) यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ ६-१८

(४) आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ६-३२

(५) अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १२-१३
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १२-१४
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १२-१५
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १२-१६
समः शत्रौ च मित्रे च तथा मानापमानयोः ॥
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १२-१८
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येनकेनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ १२-१९

(६) समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ १४-२४
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ १४-२५

अधस्तादुदाहृतश्लोकैर्जीवन्मुक्तो नाम सर्वविधाविद्याकामकर्मबन्धनैर्मुक्तः, सर्वभूतात्मभूतब्रह्मण्येव स्थितः, सुखदुःखादिद्वन्द्वातीतः— इति गम्यते । एतदेव वेदान्तविज्ञानफलं **'हृदयग्रन्थिभेदः'**, 'अविद्याग्रन्थिभेद' इति च परिभाष्यते श्रुतिषु ' यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।

अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥' (का. २-३-१५), 'पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ॥' (मुं. २-१-१०), 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' (मुं. २-२-८) इत्याद्यासु ॥

अत्र च यानि विदुषो जीवन्मुक्तस्य लक्षणान्युच्यन्ते श्रुतिस्मृतिषु, तान्येव परमपुरुषार्थसाधनानि मुमुक्षोः; तदुक्तम् –'सर्वत्रैव हि अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि, तान्येव साधनान्युपदिश्यन्ते, यत्नसाध्यत्वात्' (गी. भा. २-५५, पा. ३३) इति । अतस्त्वमपि श्रुतिस्मृतिप्रकाशितानि मुक्तलक्षणानि मनस्यनुसन्धाय तत्साधनानुष्ठानपरो भव ॥

## जीवन्मुक्तिर्न गौणी मुक्तिः

३२. किं जीवन्मुक्तव्यवहारानुकरणमेवालं कृतार्थतायै, उत किञ्चिदन्यदपि अवशिष्यते? यतो व्यवहारे द्वैतदर्शनमनुवर्तत एव, द्वैतदर्शनं चाविद्याकृतम् । अतः किं यत्नान्तरं न कार्यमेव द्वैतादर्शनार्थम्? किञ्च, केचिद् वदन्ति विदेहमुक्तिरेव मुख्या मुक्तिरिति; श्रुतिश्चात्र भवति 'विमुक्तश्च विमुच्यते' (का. २-२-१) इति । अतो विदेहमुक्तिलाभाय किं यत्नान्तरमास्थेयम्, किं वा जीवन्मुक्तिरेवालम्? – इति मे संशयः ॥

न युक्तस्तव संशयः । यतो नास्त्येव वस्तुतः कस्यचिदपि देहेन्द्रियादिः । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (का. १-२-२२), 'अप्राणो

ह्यमनाः शुभ्रः' (मुं. २–१–२), 'असङ्गो ह्ययं पुरुषः' (बृ. ४–३–१५) इत्यादिश्रुतिभ्यः। अविद्याकल्पितनामरूपविकार एव हि देहेन्द्रियसङ्घातो नाम। अत एवावोचम् – जीवतोऽपि विदुषः स्वाभाविकमशरीरत्वमिति। तस्मात्, सशरीरमुक्त्यशरीरमुक्तिविभागो न कर्तव्यः। यत्तु श्रूयते 'विमुक्तश्च विमुच्यते' (का. २–२–१), 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४–४–६) इत्यादिस्थलेषु, तत्र व्यावहारिकदृष्ट्या सशरीरत्वमुररीकृत्य विदेहमुक्त्युपदेशः क्रियते इति बोध्यम्। सदा मुक्त एव सन् विद्याप्रभावादविद्यादिभ्यो विमुक्तो भूत्वा विमुच्यते, पुनः शरीरं न गृह्णातीत्यभिप्रायः। तदुक्तं बृहदारण्यकभाष्ये 'न हि तस्य अब्रह्मत्वपरिच्छेदहेतवः कामाः सन्ति। तस्मात् इहैव ब्रह्मैव सन् ब्रह्माप्येति, न शरीरपातोत्तरकालम्। न हि विदुषो मृतस्य भावान्तरापत्तिः, जीवतोऽन्यो भावः; देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते। भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थः आत्मैकत्वाख्यः स बाधितो भवेत्; कर्महेतुकश्च मोक्षः प्राप्नोति न ज्ञाननिमित्तः – इति॥' (बृ. भा. ४–४–६, पा. ९१७) इति॥

यत्पुनरात्थ, व्यवहारे द्वैतदर्शनमनुवर्तते; द्वैतदर्शनं चाविद्याकृतम्–इति। नैष दोषः। विदुषो दृष्ट्या द्वैतदर्शनाभावात्, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. ४–५–१५) इति श्रुतेः। लौकिकव्यवहारदृष्ट्या तु यद्यपि सशरीरत्वं सेन्द्रियत्वं चास्त्येव, तथापि द्वैतदर्शनहेतोर्मिथ्याज्ञानस्य सम्यग्ज्ञानेन बाधितस्यैवानुवृत्तेः, न तेन

जीवन्मुक्तिबाधः स्यात् । यथोक्तं भाष्ये 'अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति; बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्तत एव' (सू. भा. ४–१–१५, पा. ४७५) इति । तस्मात्, बाधितमिथ्याज्ञानस्य तत्कृतद्वैतदर्शनाभासस्य च व्यवहारदृष्ट्या अनुवर्तनेऽपि न कोऽपि दोषः । न चेदं बाधितानुवृत्तं मिथ्याज्ञानं वास्तविकाविद्यालेशः, येन तत्कृतो बन्धशेषोऽप्यनुवृत्तः शङ्क्येत । तस्मात्, जीवन्मुक्तो व्यवहारे द्वैतं पश्यन्नपि न तथ्यतः पश्यति, कर्माणि कुर्वन्नपि न करोतीत्येव सिद्धान्तः । तथा ह्युक्तं गीताभाष्ये " विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः । न हि तैमिरिकदृष्ट्या अध्यारोपितस्य द्विचन्द्रादेः, तिमिरापगमे शेषोऽवतिष्ठते । एवं च सतीदं वचनमुपपन्नम् 'सर्वकर्माणि मनसा' (गी. ५–१३) इत्यादि, 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' (गी. १८–४५), 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (गी. १८–४६)–इति च " (गी. भा. १८–४८) इति ॥

अन्यत्राप्युक्तम् –

सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं च पश्यन्नपि चाद्वयत्वतः ।
तथा च कुर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥ उ. सा. १०–१३

इति ॥

तस्मात्, ज्ञानसमकाल एव या मुक्तिः सैव मुख्या मुक्तिः, विदेहमुक्तिस्तु देहान्तराप्राप्त्यपेक्षया मुक्तिरित्युपचर्यते । एतत् सर्वं व्यवहारदृष्ट्या । परमार्थतस्तु बन्धमोक्षव्यवहारोऽपि नास्ति कश्चिदभ्युपगतो वेदान्ते । तथाभ्युपगमे ह्यात्मनः बद्धावस्था, मुक्तावस्था चेति द्वे अवस्थे वास्तविके भवत इति विक्रियावान् स्यात् आत्मा, अनित्यश्च ; तच्चानिष्टम् । तथा ह्याहुरभियुक्ताः –

> न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
> न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ॰ का॰ २–३२

इति ॥

## उपसंहारः

इत्येवं शिष्याचार्यसंवादवेषेणानेन प्रकरणेन विशुद्धवेदान्तप्रस्थानप्रक्रियासारोऽत्र संगृहीतः । एतावदेव त्विहोक्तम् – अजाद्वयो नित्यशुद्धबुद्धमुक्तस्वभाव आत्मा एक एव परमार्थः, तस्मिन् नैसर्गिकया अविद्यया अनात्मतद्धर्मतत्कर्मरूपः संसारः पृथग्जनैरध्यारोपितः । तत एव प्राप्तं मिथ्याकर्तृत्वभोक्तृत्वं सत्यत्वेन आकलय्य सर्वमनर्थमश्नाति सर्वो जन्तुः । ततो निर्विण्णस्तु शास्त्रोक्ताधिकारिगुणसंपन्नः भगवदाराधनबुद्ध्या अनुष्ठितैः कर्मभिः सत्त्वशुद्धिम्, उपासनेन प्रत्यक्प्रवणतां च प्राप्य तत्त्वदर्शिनमाचार्यं प्रपन्नः श्रुतिनिर्दिष्टया अध्यारोपापवादप्रक्रियया तदुपदिष्टक्रमेण श्रवणमनननिदिध्यासनानि

यथायोगं कृत्वा स्वात्मानमेवाजम् अजरम् अमृतं ब्रह्माद्वितीयं ममाऽऽत्मा इति विज्ञाय कृतकृत्यो भवतीत्योमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवत्पादचरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्य-
सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतो
विशुद्धवेदान्तसारः

ओं तत्सत्

शुद्धशाङ्करप्रस्थानप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

१. **वेदान्तबालबोधिनी** – श्रीशङ्करभगवत्पादकृतप्रातःस्मरणस्तोत्रस्य व्याख्यानरूपा प्रश्नोत्तरी, गुरुशिष्यसंवादरूपा, अवस्थात्रयप्रक्रियासतत्त्वं विशदयन्ती ॥

२. **शुद्धशाङ्करप्रक्रियाभास्करः** – आद्यकिरणद्वयात्मकः प्रथमो भागः । अत्र प्रथमे किरणे अद्वैतमेव वेदान्तसिद्धान्त इति सर्वसंप्रतिपन्नमासीत् शङ्करभगवत्पादेभ्यः पूर्वमपि, अद्वैतिमतविशेषास्तु बहुधा भिन्ना आसन्; भगवत्पादाभिमतसाम्प्रदायिकप्रस्थानं तु प्रक्रियाविशेषावलम्बनादेव प्रस्थानान्तरेभ्यो विलक्षणम् – इति निरूपितम् । द्वितीयस्मिंस्तु श्रीशङ्करभगवत्पादसमादृता वेदान्तप्रक्रिया अनादिकालप्रवृत्ता गुरुसंप्रदायानुसारिणीति प्रतिपादितम् ॥

३. **शुद्धशाङ्करप्रक्रियाभास्करः** – तत्र पञ्चमकिरणान्तो द्वितीयो भागः । अत्र शाङ्करवेदान्तमर्यादा, शाङ्करप्रस्थानादृतप्रक्रियास्वरूपम्, तदवान्तरभेदाश्च निरूपिताः ॥

४. **शुद्धशाङ्करप्रक्रियाभास्करः** – सप्तमकिरणान्तो तृतीयो भागः । अत्र शाङ्करप्रस्थानस्य अद्वैतवादिप्रस्थानान्तरेभ्यो वैलक्षण्यं निरूपितम् । शाङ्करप्रस्थाने बौद्धमतसाम्यशङ्कापरिहारश्च प्रदर्शितः ॥

सर्वाण्यप्येतानि प्रकरणानि श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिभिर्विरचितानि । सुललितशैल्या सप्रमाणं शुद्धवेदान्तप्रस्थानतत्त्वं तत्प्रक्रियास्वरूपं च विशदयन्ति ॥

ग्रन्थमूल्यसूचिकापत्रिकार्थं प्रार्थनीयस्थानम्

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

( हासन जिल्ला, मैसूरु प्रान्तः, दक्षिण रेल्वे )

# ENGLISH BOOKS

## ON

# SHANKARA'S VEDANTA

1. **Avasthātraya** OR The Unique Method of Vedanta.

   A valuable Introduction to the study of Vedanta as the Science of Reality.

2. **S'uddha-S'āṅkara-Prakriyā-Bhāskara** – ( Light on the Vedantic Method )

   The first two sections showing how S'aṅkara's system of Vedanta belongs to one of the many Advaitic schools that prevailed even before his time, and that his system has a hoary tradition which differs from the others in respect of the peculiar method it adopts.

3. **S'uddha-S'āṅkara-Prakriyā-Bhāskara** –

   The second part consisting of three sections. It sets forth the Landmarks of S'āṅkara-Vedanta, and explains its peculiar method along with its principal varieties.

4. **S'uddha-S'āṅkara-Prakriyā-Bhāskara** –

   The third part of the work. It contrasts S'aṅkara's system with other ancient Advaitic Systems at some length and shows how the charge that it is Buddhism in disguise is utterly unfounded.

For a detail Catalogue of Books and Price List *apply to :*

## The Adhyatma Prakasha Karyalaya,

**HOLENARSIPUR.**

Hassan District, Mysore State. (S. Railway)

1000—5-9-63 The Adhyatma Prakasha Press, Holenarsipur.

शुद्धशाङ्करप्रस्थानप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

१. ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च –
सटिप्पणभाष्यसहिताः ।

२. तैत्तिरीय-आनन्दवल्ली भृगुवल्ली च – सभाष्या –
सच्चिदानन्देन्द्रकृत भाष्यार्थविमर्शिनीसहिता ।

३. माण्डूक्यरहस्यविवृतिः – श्रीसच्चिदानन्देन्द्रकृता विस्तृतव्याख्या ।

४. सुगमा – अध्यासभाष्यस्य नवीनव्याख्या सच्चिदानन्देन्द्रसरस्वतीकृता ।

५. सूत्रभाष्यार्थतत्त्वविवेचनी – जिज्ञासाधिकरणभाष्यव्याख्या ,,

६. ,, जन्माद्यधिकरणभाष्यव्याख्या ,,

७. वेदान्तप्रक्रियाप्रत्यभिज्ञा – शङ्करभगवत्पादसंमतां वेदान्तासाधारणप्रक्रियां विशदयन्ती । अत्यन्तप्राचीनकालादारभ्य सर्वज्ञात्ममुनिपर्यन्तम् वेदान्तविचारेतिहासधाराप्रदर्शिनी च । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता ।

८. पञ्चपादिकाप्रस्थानम् – शाङ्करप्रस्थानेन पञ्चपादिकाप्रस्थानस्य वैलक्षण्यं स्फुटयन् विमर्शात्मको ग्रन्थः । श्रीसच्चिदानन्देन्द्रसरस्वतीकृतिः ॥

९. क्लेशापहारिणी – श्रीसुरेश्वराचार्यप्रणीत नैष्कर्म्यसिद्धेर्नवीना व्याख्यानरूपा । वार्तिकप्रस्थानस्वरूपं सुविविक्तं बुभुत्सूनां कृते नूतनतया प्रकाशितोऽयं स्वतन्त्रनिबन्धः । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीतेयं व्याख्या जिज्ञासुभिरवश्यमवलोकनीया ॥

सविवरणग्रन्थसंस्तवार्थं मूल्यादिविशेषविज्ञानार्थं च
अभ्यर्थनीयस्थानम्

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.
( हासन जिला, मैसूर प्रान्तः, दक्षिण रेल्वे )

# THE

# ADHYATMA PRAKASHA KARYALAYA,

( ESTABLISHED 1920 )

**HOLENARSIPUR.** ( Hassan District, Mysore State, India )

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyatma Vidya — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far published more than ONE HUNDRED AND FORTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES, and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free-lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jñāna, Bhakti and Vairagya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

6. Has a TEMPLE dedicated to the service of Sri Digvijaya Rama.

Please apply to the Manager
for fuller information